# सुभाषित व्याकरण - ३५

## Subhāṣita Vyākaraṇa - 35

**(A compilation of Saṃskṛta well spoken verses with full grammar and meaning)**

**Compiler: Kishore Nayak**
**Editor: Padmakar Gangatirkar**

सोमवार श्रावण पूर्णिमा १९४६, क्रोधी संवस्तर

**यद्यपि स्वच्छभावेन दर्शयत्युदधिर्मणीन्।**
**तथापि जानुदघ्नोऽयमिति चेतसि माऽकृथाः**॥३१६॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

यद्यपि उदधिः स्वच्छभावेन मणीन् दर्शयति, तथापि अयम् जानुदघ्नः इति चेतसि मा अकृथाः ॥

Even if the ocean shows off clear intention the gems (lying underneath), then also do not ever think in your mind that it is just knee-deep.

*This is अन्योक्ति suggesting one to be careful from what may appear very attractive but may be full of danger.*

उदधिः- ocean, sea, जानुदघ्नः- knee-deep- जानु- न. लिं.- the knee, दघ्नः- reaching to, as deep/high as- जानुं दघ्नः - द्वि. तत्पु. स. & अयम् (इदम्)- he- both in पु. लिं. प्र. वि. ए. व., स्वच्छभावेन- in पु. लिं. तृ. वि. ए. व. of स्वच्छभावः- transparent manner, clear view- स्वच्छ- adjctv- very clear, transparent, pure, clean, भावः- manner, mode, condition- स्वच्छः भावः- वि. पू. प. कर्मधारय स., मणीन्- in पु. लिं. द्वि. वि. ब. व. of मणिः- gem, jewel, दर्शयति- प्रयोजक वर्त. प्र. पु. ए. व. of दृश्- to show, to exhibit- (दृश्- पश्यति- १ ग. प. प. to see, look at), चेतसि- in न. लिं. स. वि. ए. व. of चेतस्- mind, heart, thinking, अकृथाः- सामान्य (तृ) भूत आ. प. म. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, इति- a particle used report the very words spoken- 'thus', 'so', यद्यपि (यदि + अपि)- even though, तथापि (तथा+ अपि)- then also, मा- a particle of prohibition- 'lest', 'that not'- all अव्ययs

**न व्याधयो नापि यमः प्राप्तुं श्रेयः प्रतीक्षते।**
**यावदेव भवेत्कल्पस्तावच्छ्रेयः समाचरेत्**॥३१७॥ -महाभा, सभापर्व ५६.१०, वैदिकवाङ्मयम्

न व्याधयः न अपि यमः (मनुष्येण) श्रेयः प्राप्तुम् प्रतीक्षते। (तस्मात्), यावत् एव कल्पः भवेत्, तावत् (एव तेन) श्रेयः समाचरेत्॥

Illnesses or the God of Death do not wait for a man to accumulate meritorious deeds. Therefore, at any proper moment, he should perform a virtuous deed.

व्याधयः- in पु. लिं. प्र. वि. ब. व. of व्याधिः- sickness, illness, disease, यमः- Yama- God of death, श्रेयः (श्रेयस्)- righteous deed, virtue & कल्पः- proper, fit, right, opportune time- all in पु. लिं. प्र. वि. ए. व., प्राप्तुम्- पू. का. वा. हेत्वर्थक तुमन्त धा. सा. अव्यय of प्र+ आप्- to obtain, receive- (आप्- आप्नोति ५ ग. प. प. to get), प्रतीक्षते- वर्त. प्र. पु. ए. व. of प्रति+ ईक्ष्- to await, lookout for- (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe), भवेत् & समाचरेत्- विध्यर्थ प्र. पु. ए. व. of भू- भवति १ ग. प. प. to be, to exist) & समा+ चर्- to practice, to keep doing, to perform- (चर्- चरति- १ ग. प. प. to walk, move), अपि- even, also, एव- just, only, न- no, not, यावत्- till which time, when, तावत्- until then, so long as- all अव्ययs

**यस्य कस्य तरो: मूलं, येन केन अपि घर्षितम् ।**
**यस्मै कस्मै प्रदातव्यं, यत् वा तत् वा भविष्यति** ॥३१८॥ -वैदिकवाङ्मयम्

यस्य कस्य तरो: मूलम्, येन केन अपि घर्षितम्, यस्मै कस्मै प्रदातव्यम्, यत् वा तत् वा भविष्यति॥

Taking a root of this or that tree (as an herb), crushing that with this or that (herb) and administering the same to this or that person will cause this or that.

यस्य- whose & कस्य- of whom- पु/न. लि. ष. वि. ए. व. of यद्- which, what & किम्- who, what, why- यस्य कस्य- of this or that, तरोः- पु. लि. ष. वि. ए. व. of तरुः- tree, मूलम्- the root- in न. लि. द्वि. वि. ए. व., येन & केन- in पु/न. लि. तृ. वि. ए. व of यद्- & किम्- see above- येन केन- by this or that, घर्षितम्- crushed, ground, rubbed- in न. लि. प्र. वि. ए. व- घर्षित (घृष्ट)- क. भू. धा. वि. of घृष्- १ ग. प. प. to rub, strike against), यस्मै & कस्मै- in पु/न. लि. च. वि. ए. व. of यद्- & किम्- see above- यस्मै कस्मै- to the one or the other one- प्रदातव्यम्- to be given- in न. लि. प्र. वि. ए. व. -प्रदातव्य- (also प्रदानीय & प्रदेय)- क. वि. धा. सा. वि. of प्र+ दा- to give- (दा- ददाति दत्ते ३ ग. उ. प. to grant, grant), यत् वा तत् वा- this way or that way- in a unpredictable way- भविष्यति- in सामान्य (द्वि) भविष्य प्र. पु. ए. व. of भू-भवति १ ग. प. प. to be, happen to exist, अपि- also, even-अव्यय

**श्रद्धाभक्तिसमायुक्ताः नान्यकार्येषु लालसाः।**
**वाग्यताः शुचयश्चैव श्रोतारः पुण्यशालिनः॥**३१९॥ -वैदिकवाङ्मयम्

श्रद्धा-भक्ति-समायुक्ताः, अन्य-कार्येषु न लालसाः, वाग्यताः, शुचयः च एव श्रोतारः पुण्य-शालिनः (भवन्ति)॥

Virtuous listeners are those who are endowed with faith and devotion, those who do not long for other activities, those with control over their speech and those who have clean habits.

श्रद्धाभक्तिसमायुक्ताः, लालसाः, वाग्यताः, शुचयः, श्रोतारः & पुण्यशालिनः- all in पु. लिं. प्र. वि. ब. व. of श्रद्धाभक्तिसमायुक्तः- one, who is endowed with faith and devotion- श्रद्धा- trust, faith, belief, भक्तिः- devotion, attachment, loyalty, समायुक्तः- endowed with, having- समायुक्त- क. भू. धा. वि. of सम +आ+ युज्- to be along with, to have- (युज्- युनक्ति- युंक्ते ७ ग. उ. प. to join, unite)- श्रद्धा च भक्तिः च- श्रद्धाभक्तिः- द्वंद्व स. & श्रद्धाभक्त्या समायुक्तः - तृ. तत्पु. स., लालसः- ardently longing, वाग्यतः- one having control over his talking, one having humility, शुचिः- pure, undefiled, श्रोतृ- listener, audience pupil & पुण्यशालिन्- fortunate, virtuous, meritorious, अन्यकार्येषु- in पु. लिं. स. वि. ब. व. of अन्यकार्यम्- the other work- अन्य- adjctv- the other, another, कार्यम्- work, engagement, duty- कार्य (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ-करोति कुरुते ८ ग. उ. प. to do, make, न- no, not, च- and, एव- only, just, also- all अव्ययs

**देवैर्यद्यपि तक्रवद्विमथितः केदारवद्वानरैः**
**बद्धः सिद्धवदञ्जनाविजनुषा कुल्यावदुल्लङ्घितः।**
**किं चासीच्चुलुकेऽम्बुबिन्दुवदयं द्राक्कुम्भयोनेर्मुनेः**
**नातारोऽयमिति प्रथा जलनिधेरासीदथापि श्लथा** ॥३२०॥ -सुभाषितरत्नभाण्डागारम्

यद् अपि देवैः तक्रवत् विमथितः, वानरैः केदारवत् सिद्धवत् बद्धः, अञ्जनाविजनुषा कुल्यावत् उल्लङ्घितः, किं च अयं कुम्भयोनेः मुनेः चुलुके द्राक् अम्बुबिन्दुवत् आसीत् अथा अपि जलनिधेः 'अतारः अयम्' इति प्रथा न श्लथा आसीत्॥

This ocean was churned like buttermilk by Gods. It was successfully bridged as if it is a meadow by monkeys. It was crossed over as if it is a small stream by the son of Anjana- Hanuman. It instantly became just mouthful of water in the folds of palms of sage Agastya. Still, the popular belief that this ocean is not crossable has remained untarnished.

देवैः & वानरैः- both in पु. लिं. तृ. वि. ब. व. of देवः- God & वानरः- a monkey, तक्रवत्- like a buttermilk, केदारवत्- like a meadow, submerged field, सिद्धवत्- in a tight manner, in a successful way- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to accomplish, to fulfil, कुल्यावत्- like a stream, canal, small river, अम्बुबिन्दुवत्- like a drop of water- अम्बु- न. लिं.- water, बिन्दुः- a drop, small particle, mark- अम्बुनः बिन्दुः- ष. तत्पुरुष स.- वत्- suffix implies manner, nature, similarity- all in न. लिं. प्र. वि. ए. व., विमथितः- churned, बद्धः- tied up & उल्लङ्घितः- crossed over, bypassed, transgressed- all क. भू. धा. वि. of वि+ मथ्- to churn well- (मथ्- मथति १ ग. प. प. to churn, shake), बन्ध्- बध्नाति ९ ग. प. प. to bind, tie, fasten & उद्+ लङ्घ्- to pass or cross over- (लङ्घ्- लङ्घति- ते १ ग. उ. प. to leap, spring)- all in पु. लिं. प्र. वि. ए. व., अञ्जनाविजनुषा- in पु. लिं. तृ. वि. ए. व. of अञ्जनाविजनुस्- अञ्जना- name of Hanuman's mother, विजनुस्- child, creation, product, birth- अञ्जनायाः विजनुः- ष. तत्पुरुष स., चुलुके- in पु. लिं. स. वि. ए. व. of चुलुकः- handful or mouthful of water, कुम्भयोनेः, मुनेः & जलनिधेः-all in पु. लिं. ष. वि. ए. व. of कुम्भयोनिः- epithet of Agastya-rishi- कुम्भः- a pitcher, योनिः- place of birth, womb- कुम्भः योनिः यस्य सः- बहुव्रीहि स., मुनिः- saint, sage & जलनिधिः- ocean- जलम्- water, निधिः- storehouse, reservoir- जलस्य निधिः- ष. तत्पुरुष स., अतारः- un crossable- तारः- crossable- न तारः- नञ् तत्पुरुष स. & अयम् (इदम्)- he, this person- both in पु. लिं. प्र. वि. ए. व., प्रथा- practice, tradition, fame, श्लथा- (श्लथ- adjctv)- loosened, relaxed, slipped off- both in स्त्री. लिं. प्र. वि. ए. व., आसीत्- अनद्यतनभूत. प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, यद्- when, as, अपि- even, also- यद्यपि- even when, अथा- like that, अथापि- even then, द्राक्- instantly, quickly, forthwith, न- no, not, किम्- a particle of interrogation- why, च- and, इति- a particle used to quote very words spoken- thus, so- all अव्ययs

**केचिद्धि सौहृदादेव न दोषं परिचक्षते।**
**स्वार्थहेतोस्तथैवान्ये प्रियमेव वदन्त्युत** ॥३२१अ॥
**प्रियमेव परीप्सन्ते केचिदात्मनि यद्धितम् ।**
**एवम्प्रायाश्च दृश्यन्ते जनवादाः प्रयोजने** ॥३२१ब॥ -महाभा, सभापर्व-१३.४९/५०

केचित् हि सौहृदात् एव न दोषं परिचक्षते। तथैव अन्ये स्वार्थहेतोः प्रियम् एव वदन्ति उत। केचित् आत्मनि यद् हितम्, प्रियम् एव परीप्सन्ते। जनवादाः प्रयोजने एवम् प्रायाः च दृश्यन्ते॥

Some people, being friendly, do not see the faults of the other people. Some others, due to their own selfish motives, just speak what is pleasant to hear. Some others desire what is good and pleasant for themselves. Thus, mostly, people's discussions are seen for specific interest.

केचित्, अन्ये, प्रायाः & जनवादाः- all in पु. लिं. प्र. वि. ब. व. of कः+ चित्- someone, अन्यः- the other, another, प्रायः- adjctv- generally, mostly, nearly, almost & जनवादः- जनवादः-जनेषु वादः - स. तत्पु. स. discussion among people, common notion, सौहृदात्- in न. लिं. पं. वि. ए. व. of सौहृदम्- affection, friendliness, स्वार्थहेतोः- in पु. लिं. ष. वि. ए. व. of स्वार्थहेतुः- for selfish cause- स्व- one's own,

oneself, अर्थः- interest, purpose, हेतुः- reason, cause- स्वस्य अर्थः- स्वार्थः & स्वार्थस्य हेतुः- स्वार्थहेतुः- both ष. तत्पुरुष स., आत्मनि- in पु. लिं. स. वि. ए. व. of आत्मन्- oneself, one's own, यद्- which, what, हितम्- good, pleasant- हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please & प्रियम्- dear, desirable- all in न. लिं. प्र. वि. ए. व., दोषम्- fault, shortcoming, blemish & प्रियम्- dear, desirable- both in न. लिं. द्वि. वि. ए. व., परिचक्षते- वर्त. प्र. पु. ए. व. of परि+ चक्ष्- to relate, mention, to name- चक्ष्- चष्टे २ ग. आ. प. (directive in non-conjugational tenses)- to see, observe, perceive, परीप्सन्ते & वदन्ति- both वर्त. प्र. पु. ब. व. of परि+ ईप्स्- परीप्सते-to strongly wish, desire- (ईप्स्- ना. सा. धातु- ईप्सा- desire, wish- ईप्सति १ ग. प. प. to desire, wish) & वद्- वदति १ ग. प. प. to say, speak, प्रयोजने- in न. लिं. स. वि. ए. व. of प्रयोजनम्- use, application, nterest, aim, purpose, दृश्यन्ते- are seen- कर्मणि प्रयोग प्र. पु. ब. व. of दृश्- पश्यति १ ग. प. प. to see, look at, हि- surely, also, only, एव- just, only, also, एवम्- like this, in this manner, च- and, उत- a particle expressing doubt, guess, uncertainty, alternative, न- no, not, तथैव- (तथा एव)- and also, similarly, like that- all अव्ययs

**यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ।**
**समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः**॥३२२अ॥ -श्रीमद्भागवतम् ९.१९.१५

**यदा न कुरुते भावं सर्वभूतेषु पापकम्।**
**कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा** ॥३२२ब॥ - महाभा शान्तिपर्व १२.२५७.६

अ) (मनुष्यः) यदा सर्वभूतेषु अमङ्गलं भावं न कुरुते तदा (तस्य) समदृष्टेः पुंसः सर्वाः दिशः सुखमयाः (भवन्ति)॥
A) For an equanimous person who does not harbour any ill feelings towards all living beings, all directions (entire world) become full of happiness.

ब) (मनुष्यः) यदा सर्वभूतेषु पापकं भावं कर्मणा मनसा वाचा न कुरुते, तदा (तस्य) ब्रह्म संपद्यते॥
B) A person realises the Supreme Spirit (Brahman) when he does not develop any sinful thoughts towards all living beings by his action, thought or words.

भावम्, अमङ्गलम् & पापकम्- all in पु. लिं. द्वि. वि. ए. व. of भावः- disposition of mind, temperament, अमङ्गलः- inauspicious, wicked- मङ्गलः- auspicious, holy good- न मङ्गलः- अमङ्गलः- नञ् तत्पुरुष स. & पापकः- sinful, wicked- पापम्- sin- पापम् कारयति - पापकः- उपपद तत्पु स., सर्वभूतेषु- पु/न. लिं. स. वि. ब. व. of सर्वभूतः/तम्- all beings- सर्व- all, entire, whole, भूतम्- any being, creature- सर्वम् भूतम्- सर्वभूतम्- वि. पू. प. कर्मधारय स., समदृष्टेः & पुंसः- both in पु. लिं. ष. वि. ए. व. of समदृष्टिः- equal-minded, fair-minded- समा दृष्टिः - वि. पू. प. कर्मधारय स. & पुंस्- man, person, सर्वाः, सुखमयाः & दिशः- all in स्त्री. लिं. प्र. वि. ब. व. of सर्वा- , सुखमया- full of happiness- सुखम्- joy, pleasure- मय- adjctv- an affix used to indicate: 'made of', 'full. & दिश्- direction, place in general, कर्मणा & मनसा- both in न. लिं. तृ. वि. ए. व. of कर्मन्- work, deed, action & मनस्- mind, heart, thought वाचा- in स्त्री. लिं. तृ. वि. ए. व. of वाच्- speech, talk, words, ब्रह्म (ब्रह्मन्)- the Supreme Spirit, Being- in न. लिं. प्र. वि. ए. व., संपद्यते & कुरुते- वर्त. आ. प. प्र. पु. ए. व. of सं+ पद्- to arise, result, to be produced, born- (पद्- पद्यते- ४ ग. आ. प. to approach, go) & कृ- करोति कुरुते ८ ग. उ. प. to do, make, यदा- when, तदा- then, न- no, not- all अव्ययs

**षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः।**
**निद्राऽऽलस्यं भयं क्रोधो मार्दवं दीर्घसूत्रिता** ॥३२३॥ -महाभा. सभापर्व- ५.१२६

महाराज, कच्चित् ते निद्राऽऽलस्यं भयं क्रोधः मार्दवं दीर्घसूत्रता (एते) षड्, अनर्थाः पृष्ठतः कृताः?

Oh, Great King, have you put behind (overcome) six worst habits, namely, (too much) sleep, laziness, fear, anger, weakness and procrastination?

महाराज-Oh, Great King- in पु. लि. सं. वि. ए. व.- महत् (महान्)- adjctv- great, big, mighty, राजन्- King- महान् राजा- महाराजः- वि. पू. प. कर्मधारय स., कच्चित् (कः+ चित्)- whether, somewhat & क्रोधः- anger, short- temperedness- both in पु. लि. प्र. वि. ए. व., ते (तव)- yours- in ष. वि. ए. व. of युष्मद्- you, निद्राऽऽलस्यम्- sleep and laziness- निद्रा च आलस्यम् च- द्वंद्व स., भयम्-fear, dread & मार्दवम्- weakness, indulgence, softness, leniency- both in न. लिं. प्र. वि. ए. व., दीर्घसूत्रता- dilatory nature, procrastinating- in स्त्री. लि. प्र. वि. ए. व.- दीर्घ- adjctv- long, of long duration, सूत्रम्- thread, string- (सूत्र्- सूत्रयति- ते १० ग. उ. प. to bind, string together)- सूत्रता- Quality of a thread दीर्घा सूत्रता - दीर्घसूत्रता- कर्मधारय स., षड्, अनर्थाः & कृताः- all in पु. लिं. प्र. वि. ब. व. of षष्- six, अनर्थः- misfortune, calamity, troublesome thing- अर्थः- purpose, meaning, money, न अर्थः- नञ् तत्पुरुष स. & कृतः- done- कृत- क. भू. धा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, पृष्ठम्- back, behind, the other side- तः (तस्) suffix implies- पृष्ठतः- behind, the back

**यश्चित्तमन्वेति परस्य राजन्**
**वीरः कविः स्वामवमत्य दृष्टिम्।**
**नावं समुद्र इव बालनेत्राम्**
**आरुह्य घोरे व्यसने निमज्जेत्**॥३२४॥ -महाभा-सभापर्व ६३.०४, वैदिकवाङ्मयम्

राजन्, यः वीरः, कविः (अपि), स्वाम् दृष्टिम् अवमत्य, परस्य चित्तम् अन्वेति, (सः) बालनेत्राम् नावम् आरुह्य समुद्रे इव घोरे व्यसने निमज्जेत्॥

Oh, King, if a brave and wise man ignores his own views and follows the advice of others, then he sinks in a disaster like the person who ventures into sea in a not-sea-worthy boat.

राजन्- Oh, King- in पु. लिं. सं. वि. ए. व., यः (यद्,)- who, वीरः- brave, hero, warrior, कविः- wise man, one capable of thinking- all in पु. लिं. प्र. वि. ए. व., स्वाम्, दृष्टिम्, बालनेत्राम् & नावम्- all in स्त्री. लिं. द्वि. वि. ए. व. of स्वा- one's own, self, दृष्टिः- view, consideration, intellect, बालनेत्रा- one with immature eyes बाल- adjctv- newly trained, infantine, foolish, नेत्रम्- a leader, an eye- बाले नेत्रे यस्याः सा- बालनेत्रा- बहुव्रीहि स. & नौ- boat, अवमत्य & आरुह्य- both पू. का. वा. ल्यबन्त धा. सा. अव्यय of अव+ मन्- to disregard, ignore- (मन्- मन्यते, मनुते- ४ & ८ ग. आ. प. to consider, think) & आ+ रुह्- to get upon, mount, ride ascend- (रुह्- रोहति to grow, to rise, increase), परस्य- in पु. लिं. ष. वि. ए. व. of परः- the other, another, चित्तम्- thinking, thought, consideration- in न. लिं. द्वि. वि. ए. व., अन्वेति- वर्त. प्र. पु. ए. व. अनु+ इ- to follow, go after- (इ-एति २ ग. प. प. to go), समुद्रे, घोरे & व्यसने- all in स. वि. ए. व. of समुद्रः- sea, घोर- adjctv- violent, frightful, horrible, awful & व्यसनम्- distress, misfortune calamity, निमज्जेत्- विध्यर्थ प्र. पु. ए. व. of नि+ मस्ज्-to sink down- (मस्ज्- मज्जति ६ ग. प. प. to bathe, plunge), इव- like, similar to-अव्यय

**वरतरुविघटनपटवः कटवश्चञ्चन्ति वायवो बहवः।**
**तत्कुसुमबहलपरिमलगुणविन्यासे कृती त्वेकः**॥३२५॥ -वैदिकवाङ्मयम्

वरतरुविघटनपटवः कटवः बहवः वायवः चञ्चन्ति । तत् कुसुम-बहल-परिमल-गुण-विन्यासे कृती तु एकः (अस्ति) ॥

Fierce storms destroying big trees are churning around. However, among there is at least one tree which manages skilful disposition of abundant, fragrant flowers!

*There is a silver lining to every dark cloud!*

वरतरुविघटनपटवः, कटवः, बहवः & वायवः- all in पु. लिं. प्र. वि. ब. व. of वरतरुविघटनपटुः- an expert in destruction of mighty big trees- वर- adjctv- excellent, finest, good quality, तरुः- tree, विघटनम्- breaking, destruction, ruin, पटुः- a clever/ competent /expert/ skilful/ wise person- वरः तरुः- वरतरुः- वि. पू. प. कर्मधारय स., वरतरोः विघटनम्- वरतरुविघटनम्- ष. तत्पुरुष स. & वरतरुविघटने पटुः- स. तत्पुरुष स., कटु- adjctv- fierce, harsh, envious, बहुः- adjctv- many, very much, multitude & वायुः- wind, gas, चञ्चन्ति- वर्त. प्र. पु. ए. व. of चञ्च्- चञ्चति १ ग. प. प. to shake, move, dangle about, तत्कुसुमबहलपरिमलगुणविन्यासे- in पु. लिं. स. वि. ए. व. of तत्कुसुमबहलपरिमलगुणविन्यासः- management or disposition of abundant/ multitude of fragrant qualities of its flowers- तत्- that, it, कुसुमम्- flower, बहल- adjctv- very much, abundant, manifold, परिमलः- fragrance, perfume, गुणः/णं- virtue, quality nature, विन्यासः- disposition, collection, management- तस्य कुसुमम्- तत्कुसुमम्- ष. तत्पुरुष स., बहलः परिमलः गुणः- बहलपरिमलगुणः- वि. उ. प. कर्मधारय स. & तत्कुसुमस्य बहलपरिमलगुणस्य विन्यासः- तत्कुसुमबहलपरिमलगुणविन्यासः- ष. तत्पुरुष स., कृती (कृतिन्)- a clever/ competent /expert/ skilful/ wise performer or doer & एकः- one, single- both in पु. लिं. प्र. वि. ए. व., तु- but, on the other hand- अव्यय

**अप्याकरसमुत्पन्ना मणिजातिरसंस्कृता ।**
**जातरूपेण कल्याणि न हि संयोगमर्हति** ॥३२६॥ -मालविकाग्निमित्रम् ५.१८, वैदिकवाङ्मयम्

कल्याणि, आकरसमुत्पन्ना मणिजातिः अपि, असंस्कृता (मणिः) जातरूपेण संयोगम् नहि अर्हति ॥

There is a पा. भे. with a positive note:
अप्याकरसमुत्पन्नो रत्नजातिपुरस्कृतः।
जातरूपेण कल्याणि मणिः संयोगमर्हति॥

Oh Blessed lady, even though a gem is the product of reputed mine, it does not deserve to be associated with the gold if it is not duly polished.

आकरसमुत्पन्ना- one that is produced or obtained from a mine- आकर- mine, rich source- समुत्पन्न- produced, occurred- क. भू. धा. वि. of सं+उत्+ पद्- to be produced, born- (पद्- पद्यते ४ ग. आ. प. to go, move)- आकरे समुत्पन्ना - स. तत्पुरुष स., मणिजातिः- मणिः- पु/स्त्री. लिं.- gem, jewel, जातिः- स्त्री. लिं.- lineage, family, race, class- मणेः/मण्याः जातिः- ष. तत्पुरुष स., असंस्कृता- adjctv- unpolished, not refined or cleansed- न संस्कृता- नञ् तत्पुरुष स.- all स्त्री. लिं. प्र. वि. ए. व., जातरूपेण- in न. लिं. तृ. वि. ए.

व. of जातरूपम्- gold- (जातरूप- adjctv- brilliant, beautiful- जातः रूपं यस्य सः- जातरूपः- बहुव्रीहि स.), कल्याणि- adjctv- blessed, beautiful, lucky, lovely, fortunate- in स्त्री. लिं. सं. वि. ए. व., संयोगम्- in पु. लिं. द्वि. वि. ए. व. of संयोगः- union, association, conjunction, अर्हति- वर्त. प्र. पु. ए. व. of अर्ह्- १ ग. प. प. to deserve, merit, be worthy of, अपि- also, even, न- no not, हि- surely, certainly- all अव्ययs

**प्रियो भवति दानेन प्रियवादेन चापरः।**
**मन्त्रमूलबलेनान्यो यः प्रियः प्रिय एव सः** ॥३२७॥ -महाभा.उद्योगपर्व ३९.०३, वैदिकवाङ्मयम्

(कश्चित् मनुष्यः) दानेन प्रियः भवति, अपरः प्रियवादेन च (प्रियः भवति), अन्यः मन्त्रमूलबलेन (प्रियः भवति), यः (जात्या) प्रियः (अस्ति) सः प्रियः एव (भवति)॥

A person becomes likable by his charity. Another is loved due to his pleasant talking. Yet another is loved for giving sound advice. An inherently dear person remains dear all the time.

प्रियः- desirable, pleasant, beloved, अपरः- adjctv- other another, अन्यः- different, other, another, यः (यद्)- who, सः (तद्)- he- all in पु. लिं. प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, to become, दानेन, प्रियवादेन मन्त्रमूलबलेन- all in तृ. वि. ए. व. of दानम्- giving, granting, donation, प्रियवादः- sweet talk, pleasant words- प्रिय- adjctv- pleasant, desirable, वादः- speaking, talk- प्रियः वादः- वि. पू. प. कर्मधारय स. & मन्त्रमूलबलम्- strength of sound advice- मन्त्रः- counsel, advice, consultation, मूल- basic, original, prime, बलम्- strength, power- मन्त्रः मूलम् यस्य तद्- मन्त्रमूलम्- basic counsel, prime advice- मन्त्रमूलम् बलम्- मन्त्रमूलबलम्- वि. पू. प. कर्मधारय स., एव- just, only, merely, च- and- both अव्ययs

**नरपतिहितकर्ता द्वेष्यतां याति लोके**
**जनपदहितकर्ता त्यज्यते पार्थिवेन।**
**इति महति विरोधे विद्यमाने समाने**
**नृपतिजनपदानां दुर्लभः कार्यकर्ता** ॥३२८॥-- पञ्चतंत्र- वैदिकवाङ्मयम्

नर-पति-हित-कर्ता लोके द्वेष्यतां याति । जन-पद-हित-कर्ता पार्थिवेन त्यज्यते । इति महति विरोधे विद्यमाने, नृपतिजनपदानां समाने कार्यकर्ता दुर्लभः (भवति)॥

A person working for the good of the King is disliked by the general public. He gets rejected by the King, if he works for the benefits of the community. In such a difficult dilemma, a person who can work equally for the interests of both the King and his subjects is very difficult to find.

नरपतिहितकर्ता- one who works in favour of a king/ruler- नरः- a man, human, पतिः- husband, master, हित- good, favour, benefit- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, कर्तृ - doer, maker- नराणां पतिः- नरपतिः & नरपतेः हितम्- नरपतिहितम्, & नरपतिहितस्य कर्ता- नरपतिहितकतृ- all ष. तत्पुरुष स., जनपदहितकर्ता- one who works in favour of general public/subjects- जनः- people, subjects, पदः- position, subject, matter, entity- जनस्य पदः- जनपदः- community, public & जनपदस्य हितम्- जनपदहितम्- both ष. तत्पुरुष स. & जनपदहितस्य कर्ता - जनपदहितकतृ- all ष. तत्पुरुष

स. दुर्लभः- one who is very difficult to find- दुःखेन लभ्यते इति- उपपद तत्पुरुष स., & कार्यकर्ता- the worker, volunteer- कार्य- a work to be done, assignment, duty- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do, make- कार्यस्य कर्ता - कार्यकर्ता - all in पु. लिं. प्र. वि. ए. व., द्वेष्यताम्- in स्त्री. लिं. द्वि. वि. ए. व. of द्वेष्यता- hatred, wrath- द्वेष्य- (also द्वेष्टव्य & द्वेषणीय)- क. वि. धा. सा. वि. of द्विष्- द्वेष्टि द्विष्टे २ ग. उ. प. - to hate, dislike)- ता suffix implies quality, nature, याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, to come to pass, to happen, त्यज्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, लोके पार्थिवेन- in पु. लिं. तृ. वि. ए. व. of पार्थिवः- king- पृथिवी- earth- पार्थिवः- earthen, relating to the earth, an inhabitant of the earth, king), महति, विरोधे, विद्यमाने, & समाने- in पु. लिं. स. वि. ए. व. of महत्- great, very big, विरोधः- contrast, difference, opposition, विद्यमानः- existing, happening, remaining- विद्यमान- कर्तरि वर्त. का. वा. धा. सा. वि. of विद्- विद्यते ४ ग. आ. प. to be, to exist & समानः- same, equal, balancing, नृपतिजनपदानाम्- in पु. लिं. ष. वि. ब. व. of नृपतिजनपदौ- a king and the subjects- नृपतिः च जनपदः च- ,द्वंद्व स.- नृ- a man, human, पतिः- husband, master- नृणाम् पतिः- नृपतिः- king, जनपदः- see above, इति- a particle used to represent very words spoken- this, so- अव्यय

**आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।**
**नेत्रवक्त्रविकाराभ्यां लक्ष्यतेऽन्तर्गतं मनः** ॥३२९॥ - गरुड़ पुराण-१०९-५२, हितोपदेश- सुहृद् भेद ५०,

आकारैः, इङ्गितैः, गत्या, चेष्टया, भाषितेन च नेत्र-वक्त्र-विकाराभ्यां अन्त-र्गतं मन: लक्ष्यते॥

One can percieve what is going on internally im somebody's mind from his appearance, gestures, bodily movements, behaviour, spoken words and the movement of his eyes and face.

आकारैः & इङ्गितैः- both in पु. लिं. तृ. वि. ब. व. of आकारः- form, size, shape & इङ्गितः- gesture, hint, intention, गत्या & चेष्टया- both in स्त्री. लिं. तृ. वि. ए. व. of गतिः- gait, situation & चेष्टा- motion, action, behaviour, भाषितेन- in न. लिं. तृ. वि. ए. व. of भाषितम्- utterance, speech, words- भाषित- क. भू. धा. वि. of भाष्- भाषते १ ग. आ. प. to say, speak, नेत्रवक्त्रविकाराभ्याम्- in पु. लि. तृ. वि. द्वि. व. of नेत्रवक्त्रविकारः- transformations in eyes and face- नेत्रम्- an eye, वक्त्रम्- face, विकारः- change of form, transformation- नेत्रम् च वक्त्रम् च- नेत्रवक्त्रौ- द्वंद्व स & नेत्रवक्त्रयोः विकारः- ष. तत्पुरुष स., अन्तर्गतम्- hidden inside, concealed within- अन्तर्- अव्यय- inside, within गतम्- gone, passed- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- अन्तर् गतम्द- अन्तर्गतम्- अव्ययीभाव स. & मन: (मनस्)- mind, heart- both in न. लिं. प्र. वि. ए. व., लक्ष्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of लक्ष्- लक्षते १ ग. आ. प. to notice, perceive, observe, apprehend, च-and- अव्यय

**भोज्यं यथा सर्वरसं विनाज्यं**
**राज्यं यथा राजविवर्जितं च।**
**सभा न भातीव सुवक्तृहीना**
**गोलानभिज्ञो गणकस्तथात्र**॥ ३३०॥ -- भास्कराचार्य, सिद्धान्तशिरोमणि, गोलाध्याय, श्लोक ४

यथा सर्वरसं भोज्यं, विनाज्यं (न भाति), यथा राज्यं राजविवर्जितं च (न भाति), (यथा) सभा सुवक्तृहीना न भाति, तथा इव, अत्र गोलानभिज्ञः गणकः (न भाति)॥

A food full of all flavours does not taste good without ghee. A kingdom without a King and an assembly without a good speaker do not fare well. Similarly, an astrologer without the knowledge of celestial bodies does not shine well here.

सर्वरसम्- सर्व- adjctv- all, whole, entire, रसः- taste, flavour- सर्वम् रसम्- सर्वरसम्- कर्मधारय स.,भोज्यम्- food meal- edible thing, one that is to be eaten- भोज्य- (also भोजनीय, भोक्तव्य & भोग्य)- क. वि. धा. सा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to eat, enjoy, विनाज्यम्- one that is devoid of ghee- विना- अव्यय- without, devoid of आज्यम्- ghee, clarified butter- आज्येन विना -- अव्ययीभाव स., राज्यम्- state, country, राजविवर्जितंम्- one that is devoid of a king/ruler- राजा (राजन्)- king, ruler, विवर्जितम्- devoid of, one without- विवर्जित- क. भू. धा. वि. of वि+ वृज्- to shun, avoid- (वृज्- वर्जति १ ग. प. प. to give, avoid)- राज्ञा विवर्जितं - तृ तत्पु स.- all in न. लिं. प्र. वि. ए. व., सभा- assembly, meeting, a gathering & सुवक्तृहीना- one that is devoid of a good speaker- सु- अव्यय- good excellent, nice, वक्तृ- speaker, हीन- adjctv- devoid of, absent- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon- सुभगः वक्ता- सुवक्ता- प्रादि कर्मधारय स. & सुवक्त्रा हीना- सुवक्तृहीना- तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., भाति- वर्त. प्र. पु. ए. व. of भा- to look splendid, shine, to show oneself, गोलानभिज्ञः- one who is ignorant about celestial bodies- गोलः- globe, celestial body, a sphere, अभिज्ञः- adjctv- knowing, aware of or acquainted with- न अभिज्ञः- अनभिज्ञः- नञ् तत्पुरुष स.- ignorant- गोलानाम् अनभिज्ञः - षष्ठी तत्पु स. & गणकः- an astrologer, arithmetician- both in पु. लिं. प्र. वि. ए. व., यथा- like which, in which way, तथा- like that, in that way, इव- like, similar to, अत्र- here, च- and, न- no, not- all अव्ययs

**विक्लवो वीर्यहीनो यस्स दैवमनुवर्तते।**
**वीरास्सम्भावितात्मानो न दैवं पर्युपासते**॥३३१॥ -रामायण- २.२३.१६, -वैदिकवाङ्मयम्

यः विक्लवः, वीर्यहीनः (अस्ति) सः दैवम् अनुवर्तते। वीराः सम्भावितात्मानः दैवं न पर्युपासते॥

(Laxmana to Rama, when he learnt about his plans to leave for forest as ordered by Kaikeyi.)

A timid and gutless person depends on the destiny. The brave and proud do not rely on destiny.

यः (यद्)- who, विक्लवः- adjctv- timid, frightened, confused, distressed, afflicted, वीर्यहीनः- valourless, weak, gutless- वीर्य- heroism, valour, prowess, strength, हीनः- devoid of, lacking- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon- वीर्येण हीनः- तृ. तत्पुरुष स., सः (तद्)-he- all in पु. लिं. प्र. वि. ए. व., दैवम्- fate, destiny, luck, fortune- in न. लिं. द्वि. वि. ए. व., अनुवर्तते- in वर्त. प्र. पु. ए. व. of अनु+ वृत्- to follow, to go accordingly- (वृत्- वर्तते १ ग. आ. प. to to be, to exist, remain) & पर्युपासते- वर्त. प्र. पु. ए. व. of परि+उप+ आस्- to worship, attend upon, serve respectfully- (आस्- आस्ते २ ग. आ. प. to sit, lie, dwell), वीराः & सम्भावितात्मानः- both in पु. लिं. प्र. वि. ब. व. of वीरः- barve, hero, strong & सम्भावितात्मन्- सम्भावित- respected, esteemed, considered, fit/ fitted- प्रयोजक क. भू. धा. वि. of सं+ भू- (भू- भवति १ ग. प. प. tine, to exist), आत्मन्- self, oneself, soul, mind, heart-

सम्भावितः आत्मा यस्य सः- बहुव्रीहि स., दैवम्- in पु. लिं. प्र. वि. ए. व., न- no, not & एव- just, only, mere- both अव्ययs

**अव्याधिजं कटुजं तीक्ष्णमुष्णं**
**यशोमुषं परुषं पूतिगन्धिम् ।**
**सतां पेयं यन्न पिबन्त्यसन्तो**
**मन्युं महाराज पिब प्रशाम्य** ॥३३२॥ -महाभा सभापर्व ६४.१८

महाराज, (तद्) मन्युं (नाम पेयं), प्रशाम्य, पिब । यद् सतां पेयं, अव्याधिजं, कटुजं, तीक्ष्णम् उष्णं, यशोमुषं, परुषं, पूतिगन्धिम्, (यद्) असन्तः न पिबन्ति॥

Oh, Great King! Please "drink this anger" after calming down fully. (Only) virtuous people drink it. It cures mental distress. Yes, it is bitter, very hot; destroyer of the glory, abusive and foul-smelling.The wicked people do not drink it.

*The good people subdue their anger. Bad people do not.*

महाराज- Oh, great king- in पु. लि. सं. वि. ए. व. महत्- adjctv- heat, big, mighty, राजन्- king- महान् राजा- महाराजः- वि. पू. प. कर्मधारय स., प्रशाम्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्र+ शम्- to fully calm down, compose- (शम्- शाम्यति- ४ ग. प. प. to be calm, quiet), अव्याधिजम्, कटुजम्, तीक्ष्णम्, उष्णम्, यशोमुषम्, परुषम्, पूतिगन्धिम्, मन्युम्- all in पु. लिं. द्वि. वि. ए. व. of अव्याधिजः- one that is curing the mental distress- व्याधिः- illness, sickness, mental distress- न व्याधिः- अव्याधिः- नञ् तत्पुरुष स. & अव्याधिं जनयति इति- अव्याधिजः- उपपद तत्पुरुष स, कटुजः- one causing bitterness- कटु- adjctv- bitter, pungent- कटुम् जनयति इति- कटुजः- उपपद तत्पुरुष स, तीक्ष्णः- adjctv- harsh, hard, उष्णः- adjctv- hot, pungent, यशोमुषः- destroyer of glory- यशस्- न. लिं.- glory, fame, name- यशः मुष्णाति इति- यशोमुषः- उपपद तत्पुरुष स, परुष- adjctv- abusive, cruel, harsh, पूतिगन्धिः- foul smelling- पूति- adjctv- stinking, foul, गन्धः- smell, odour- पूतिः गन्धः यस्य सः- पूतिगन्धिः- बहुव्रीहि स., मन्युम्- anger, wrath, rage, पेयम्- a drink, beverage & यद्- which- both in न. लिं. द्वि. वि. ए. व., सताम्- in पु. लिं. ष. वि. ब. व. of सत्- noble or virtuous person, असन्तः- in पु. लिं. प्र. वि. ब. व. of असत्- bad or wicked person- न सत्- नञ् तत्पुरुष स., पिबन्ति- वर्त. प्र. पु. ब. व. of पा- पिबति १ ग. प. प. to drink & पिब- आज्ञार्थ म. पु. ए. व. of पा- पिबति, न- no, not- अव्यय

**गुणवान् सुचिरस्थायी दैवेनापि न सह्यते।**
**तिष्ठत्येकां निशां चन्द्रः श्रीमान् सम्पूर्णमण्डलः** ॥३३३॥ -सूक्तिमुक्तावली ३०१

दैवेन अपि गुणवान् सुचिरस्थायी न सह्यते। श्रीमान् चन्द्रः सम्पूर्णमण्डलः एकां निशां (एव) तिष्ठति ॥

A virtuous person is not tolerated by destiny staying (living) too long. A glorious full Moon is seen only for one night (in a month).

गुणवान् (गुणवत्)- virtuous, meritorious, excellent- गुणः- virtue, quality, excellence- वत्- suffix implies quality, possession, सुचिरस्थायी (सुचिरस्थायिन्)- remaining present for a very long time- सु- अव्यय- prefix implies good, very much, चिर- adjctv- long, lasting a long time, स्थायिन्- staying, being situated, stationary- सुतराम् चिरम्- सुचिरम्- प्रादि कर्मधारय स.  & सुचिरम् स्थायिन् - सुचिरस्थायिन्- कर्मधारय स., श्रीमान् (श्रीमत्)-(सुचिरस्थायिन्) glorious prosperous, beautiful, pleasing, चन्द्रः- Moon & सम्पूर्णमण्डलः- full circular orb- सम्पूर्ण- completely full, to the fullest, whole- क. भू. धा. वि. of सं+ पूर्- to fillout fully- (पूर्- पूर्यते ४ ग. आ. प. to fill, satisfy), मण्डल- adjctv- round, circular- सम्पूर्णः मण्डलः - वि. पू. प. कर्मधारय स.- all in पु. लिं. प्र. वि. ए. व., दैवेन- in. न. लिं. तृ. वि. ए. व. of दैवम्- fate, destiny, luck, fortune, सह्यते- कर्मणि प्रयोग प्र. पु. ए. व. of सह्- सहते १ ग. आ. प. to tolerate, bear, endure, एकाम् & निशाम्- both in स्त्री. लिं. द्वि. वि. ए. व. of एका-one, single & निशा- night, तिष्ठति- वर्त. प्र. पु. ए. व. of स्था- १ ग. प. प. to stay, stand, अपि- also, even, न- no, not- both अव्ययs

**अनिभालित एव केवलं खनिगर्भे निधिरेष जीर्यतु।**
**न तु सीदतु मूल्यहानितो वणिजालोकनगोचरीकृतः**॥३३४॥ -सुभाषितरत्नभाण्डागारम्

एषः निधिः, वणिज् आलोकन- गोचरीकृतः अनिभालितः (भवतु)। एव केवलं खनिगर्भे जीर्यतु। न तु मूल्यहानितः सीदतु॥

Let this treasure (of gems) remain hidden to the sight of the traders! Let it grow old (remain forever) in the cavities of the mine itself! Let it not face the loss of its real worth (in their hands)!

*People have been exploiting the treasures of our planet for their own gains. Let us presrve it, undisturbed, for future generations.*

एषः (एतद्)- this, it, निधिः- storehouse, treasure, hoard, अनिभालितः- unseen, imperceivable, hidden- निभालित- क. भू. धा. वि. of नि+ भल्- to see, perceive- (भल्- भालयते १० ग. आ. प. to see, to behold)- न निभालित- अनिभालित- नञ् तत्पुरुष स. & वणिजालोकनगोचरीकृतः- exposed to the viewing of a trader/merchant- वणिज्-trader, merchant, आलोकन- seeing, beholding, गोचरीकृतः- brought into view, exposed, revealed, गोचरीकृत- क. भू. धा. वि. of गोचरी+कृ- च्वि रूप- to be observable, to bring into light, expose- (कृ- करोति कुरुते ८ ग. उ. प. to do make)- वणिजः आलोकनम्- वणिजालोकनम्- ष. तत्पुरुष स.  & वणिजालोकनाय गोचरीकृतः- च. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व.,खनिगर्भे- in पु. लिं. स. वि. ए. व. of खनिगर्भः- in the folds of a mine- खनिः- स्त्री. लिं.- a mine, a cave, गर्भः- womb, belly, inside, interior- खनेः गर्भः- ष. तत्पुरुष स, मूल्यहानितः- by suffering the loss of value- मूल्यम्- price, worth, cost, मूल्य- loss, failure, absence- मूल्यस्य हानिः- मूल्यहानिः- ष. तत्पुरुष स. & तः (तस्)- suffix implies पं. वि.- by, from, सीदतु & जीर्यतु- both आज्ञार्थ प्र. पु. ए. व. of सद्- सीदति ६ ग. प. प. to go to ruin, waste away, perish & जृ(दीर्घ)- जीर्यति ४ ग. प. प. to wither, wear out, grow old, एव- just, merely, only, न- no, not, तु- but, just, on the other hand, केवलम्- merely, solely, only, entirely, absolutely, wholly- all अव्ययs

**काचाः काञ्चनभूषिताः कति न वा मुष्णन्ति रत्नश्रियं,**
**मौलौ वा कति नोद्वहन्त्यपधियस्तानेव रत्नभ्रमात्।**
**अक्ष्णां ये पुनरुन्मृजन्ति तिमिरं यैर्नाम रत्नाकरः,**
**सिन्धुस्ते पृथगेव हन्त मणयस्तेष्वप्यभिज्ञाः पृथक्** ॥३३५॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

कति काञ्चनभूषिताः काचाः रत्नश्रियं न वा मुष्णन्ति। कति न अपधियः वा तान् रत्नभ्रमात् एव मौलौ उद्वहन्ति। पुनः ये (कति न ) अक्ष्णां तिमिरं उन्मृजन्ति। (ते) मणयः, यैः ते सिन्धुः रत्नाकरः (इति) नाम, पृथग् (सन्ति)। हन्त तेषु अभिज्ञाः अपि, एव पृथक् (भवन्ति) ॥

How many glass beads, decked up in gold, do not steal splendour of real gems? How many wise people adorn them on their crowns, mistaking them for real gems? Then again, how many (glass beads) do not drive away darkness of eyes? But, those real gems, because of whom the ocean is named as 'Ratnakara', are different. Indeed, the experts who identify them (as real gems) are also unique.

*This is an अन्योक्ति which talks about fraudulent vs. genuine people. Fraudulant people do fool even wise men in believing that they are real with uncanny resemblence to real things. But it really takes a genuine intelligent peron to seprate fraud from the truth.*

काञ्चनभूषिताः, काचाः, अपधियः, ये, ते, अभिज्ञाः- all in पु. लिं. प्र. वि. ब. व. of काञ्चनभूषित- decked in gold- काञ्चनम्- gold, भूषित- decorated, adorned- क. भू. धा. वि. of भूष्- भूषति १ ग. प. प. to adorn, deck- काञ्चनेन भूषितः - तृ. तत्पु. स., काचः- glass, glass bead, crystal, अपधीः- a stupid or foolish person- अप- अव्यय- a prefix implies: bad, devoid of, wrong, opposite, without, धीः- an intellect, wise, understanding, यद्- who, तद्- he, अभिज्ञः- a real expert, knowledgeable person- अभि- अव्यय- a prefix implies: extra, true, additional- ज्ञः- knowing, expert & कति (a pron. adjctv- always in plural)- how many, रत्नश्रियम्- in स्त्री. लिं. द्वि. वि. ए. व. of रत्नश्री- splendour of real gem- रत्नम्- gem, jewel, श्री- dignity, grace, majesty- रत्नस्य श्री- ष. तत्पुरुष स., मुष्णान्ति, उद्वहन्ति & उन्मृजन्ति- वर्त. प्र. पु. ब. व. of मुष्- मुष्णाति ९ ग. प. प. to steal, carry off, captivate, उद्+ वह्- to elevate, support, carry- (वह्- वहति- ते- to carry, to bear) & उद्+ मृज्- to remove, wipe off- (मृज्- मृजति ६ ग. प. प. to wipe or wash off), मौलौ- in पु/स्त्री. लिं. स. वि. ए. व. of मौलिः- crown, तान्- them- पु. लिं. द्वि. वि. ब. व. of तद्- he, रत्नभ्रमात्- पु. लिं. पं. वि. ए. व. of रत्नभ्रमः- delusion of a gem- भ्रमः- delusion, mistake, रत्नस्य भ्रमः- ष. तत्पुरुष स, अक्ष्णाम्- in न. लिं. ष. वि. ब. व. of अक्षि- an eye, तिमिरम्- darkness- in न. लिं. द्वि. वि. ए. व., यैः- due to whom- in पु. लिं. प्र. वि. ब. व. of यद्- who, सिन्धुः- ocean & रत्नाकरः- Treasure house of Gems- रत्नम्- gem, आकरः- mine, source- रत्नानाम् आकरः- ष. तत्पुरुष स., मणयः- in पु. लिं. प्र. वि. ब. व. of मणिः- gem, jewel, तेषु- to them- in पु. लिं. स. वि. ब. व. of तद्- he, एव- just, merely, only, वा- or, and, पृथक्- different, separate, नाम- a particle used as: named, called, truly, indeed, हन्त- a particle implying: surprise, pity, sorrow, न-no, not, अपि- also, even, पुनः (पुनर्)- again, once more- all अव्ययs

**आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं**
**तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।**

**शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते**
**जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम्**॥३३६॥ -भर्तृहरि- वैरग्यशतकम्-४९

नृणां आयुः वर्षशतं परिमितं (अस्ति)। तदर्धं रात्रौ गतं। तस्य परस्य अर्धस्य च अर्धम् अपरं बालत्ववृद्धत्वयोः (गतौ) । शेषं व्याधि- वियोग-दुःख-सहितं सेवादिभिः नीयते। जीवे वारि-तरङ्ग-चञ्चल-तरे, प्राणिनां सौख्यं कुतः (भवति)?
Life-span of men is limited to a period of hundred years. Half of that goes in nights. Out of the other half, the first and quarter are spent in childhood and old-age. The balance is spent in sickness, separation, sorrow and services to others. Thus, where is the happiness for living beings during this unsteady life which is like waves over the water?

नृणाम् & प्राणिनाम्- both in पु. लिं. ष. वि. ब. व. of नृ- a man, person & प्राणिन्- a living being, a breathing being, आयुः (आयुस्)- age, life, period of life, वर्षशतम्- a hundred year- वर्षम्- a year, शतम्- a hundred- शताणि वर्षाणि- वि. उ. प. कर्मधारय स., परिमितम्- limited- परिमित- क. भू. धा. वि. of परि+ मा- to limit- (मा- माति २ ग. प. प. to measure), तदर्धम्- a half of that- तद्- that, it, अर्धम्- half- तस्य अर्धम्- ष. तत्पुरुष स., गतम्- gone, spent- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, pass, अर्धम्- half, अपरम्- second, another, सौख्यंशम्- happiness, pleasure & व्याधिवियोगदुःखसहितम्- व्याधिः- sickness, disease वियोगः- separation, दुःखम्- sorrow, grief, सहितम्- together, along with- व्याधिः च वियोगः च दुःखम् च- व्याधिवियोगदुःखम्- द्वंद्व स. & व्याधिवियोगदुःखेन सहितम्- तृ. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., रात्रौ- in स्त्री. लिं. स. वि. ए. व. of रात्रिः- night, तस्य, अर्धस्य & परस्य- all in न. लिं. ष. वि. ए. व. of तद्- that, it, अर्धम्- half & परम्- other, another, बालत्ववृद्धत्वयोः- in न. लिं. ष. वि. द्वि. व. of बालत्ववृद्धत्वम्- childhood and old-age- बालः- a child, वृद्धः- an oldman- त्वम् suffix implies category, quality, case- बालत्वम्- childhood & वृद्धत्वम्- old-age- बालत्वम् च वृद्धत्वम् च-द्वंद्व स., सेवादिभिः- स्त्री. लिं. तृ. वि. ब. व. of सेवादिः- services etc.- सेवा- service, serving, आदिः- beginning, commencement- at the end of compound implies: beginning with, etc., and others, नीयते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of नी- नयति- ते १ ग. उ. प. to carry, take, conduct, जीवे & वारितरङ्गचञ्चलतरे- both in स. वि. ए. व. of जीवः- life, living & वारितरङ्गचञ्चलतरम्- unsteady like that of waves over the water, वारि- न. लिं- water, तरङ्गः- a wave, चञ्चल- adjctv- unsteady, tremulous, तर- adjctv- a suffix implies like, similar to- वारिणः तरङ्गः- वारितरङ्गः- ष. तत्पुरुष स. & वारितरङ्गः इव चञ्चलतरम्- उ. पू. प. कर्मधारय स., कुतः (कुतस्)- from where, च- and- अव्ययs

**वनेऽपि सिंहा मृगमांसभक्षिणो**
**बुभुक्षिता नैव तृणं चरन्ति।**
**एवं कुलीना व्यसनाभिभूता**
**न नीचकर्माणि समाचरन्ति** ॥३३७॥ -असम-संस्कृतसाहित्यम्

वने सिंहाः मृगमांसभक्षिणः, बुभुक्षिताः अपि, न एव तृणं चरन्ति। एवं कुलीनाः, व्यसनाभिभूताः (अपि) नीचकर्माणि न समाचरन्ति॥

The lions in the forest do not graze grass, even if they are starving. Similarly, people from reputable families, do not do condemnable deeds even at the time of distress.

वने- in न. लिं. स. वि. ए. व. of वनम्- forest, सिंहाः, मृगमांसभक्षिणः, बुभुक्षिताः, कुलीनाः & व्यसनाभिभूताः- all in पु. लिं. प्र. वि. ब. व. of सिंहः- lion, मृगमांसभक्षिन्- मृगमांसम् भक्षिन्- द्वि. तत्पु. स. one, who eats flesh of animals- मृगम्- animal, a deer, मांसम्- flesh, meat, भक्षिन्- eater (भक्षयति- ते १० ग. उ. प. to eat, devour), बुभुक्षित- adjctv- starving, pinched with hunger, कुलीन- adjctv- of high decent, well-born & व्यसनाभिभूतः- one who is in distress/hard-time- व्यसनम्- distress, ill-luck, adversity, अभिभूत- adjctv- overcomed, subdued, vanquished, attacked- क. भू. धा. वि. of अभि+ भू- (भू- भवति १ ग. प. प. to be, to exist, become)- व्यसने अभिभूतः - तृ. तत्पु. स., तृणम्- grass, straw- in न. लिं. द्वि. वि. ए. व., नीचकर्माणि- in न. लिं. द्वि. वि. ब. व. of नीचकर्म- नीच-adjctv- mean, low, condemnable, कर्मन्- work, act, deed- नीचम् कर्म- वि. पू. प. कर्मधारय स., चरन्ति & समाचरन्ति- both in वर्त. प्र. पु ब. व. of चर्- चरति- १ ग. प. प. to graze, to roam, move, practice & सं+ चर्- to perform, practice, to do, अपि- even, also, and, न- no, not, एव- just, merely, only & एवंम्- similarly, like that, accordingly- all अव्ययs

**सन्तोऽपि न हि राजन्ते दरिद्रस्येतरे गुणाः ।**
**आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी**॥३३८॥ -मित्रसंप्राप्तिः, पञ्चतन्त्रः, सुधर्मा

दरिद्रस्य इतरे गुणाः सन्तः अपि न हि राजन्ते। आदित्यः भूतानां इव श्रीः गुणानां प्रकाशिनी (भवति) ॥

All other meritorious qualities of a poor man do not get acknowledged (in the presence of his poverty). Just like the Sun shines light on all living beings, wealth reveals all virtues (of a person).

दरिद्रस्य- in पु. लिं. ष. वि. ए. व. of दरिद्रः- a poor man, इतरे, गुणाः & सन्तः- all in पु. लिं. प्र. वि. ब. व. of इतरः- the other, गुणः- virtue, good quality, nature & सत्- having, endowed with- कर्तरि वर्त. का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, to exist, राजन्ते- वर्त. प्र. पु. ब. व. of राज्- राजति- ते १ ग. उ. प. to shine, to appear splendid, to be eminent, आदित्यः - the Sun, भूतानाम् & गुणानाम्- both in पु. लिं. ष. वि. ब. व. of भूतः- a being, object- भूत- क. भू. धा. वि. of भू- भवति १ ग. प. प. to, श्रीः- wealth, prosperity, riches & प्रकाशिनी (प्रकाशिन्- adjctv- bright, shining)- one, who brightens up, brings out to the light- both in स्त्री. लिं. प्र. वि. ए. व., अपि- also, even, न- no, not, हि- surely, certainly, just, इव- like similar to- all अव्ययs,

**ऐश्वर्यमल्पमेत्य प्रायेण हि दुर्जनो भवति मानी।**
**सुमहत्प्राप्यैश्वर्यं प्रशमं प्रतिपद्यते सुजनः**॥३३९॥ -महासुभाषितसङ्ग्रहः, सुधर्मा

दुर्जनः प्रायेण ऐश्वर्यम् अल्पम् एत्य हि मानी भवति। सुजनः सुमहत् ऐश्वर्यं प्राप्य (अपि) प्रशमं प्रतिपद्यते॥

Generally, a wicked becomes arrogant after acquiring little wealth. (On the other hand), a cultured person remains calm even after acquisition of real great wealth.

दुर्जनः- a bad man, wicked person, सुजनः- a gentleman, decent person, a person of good behaviour- (दुस्/दुर्- अव्यय- prefix implies: bad, wicked, hard & सु- अव्यय- good, decent- जनः- person, people- दुष्टः जनः & सुशीलः जनः- both प्रादि कर्मधारय स.) & मानी- (मानिन्)- proud, arrogant,

haughty- all in पु. लिं. प्र. वि. ए. व., ऐश्वर्यम्- riches, affluence, prosperity, अल्पम्- little, small, सुमहत्- really great, tremendous- सु- अव्यय- good, big, महत् great, mighty- सुतराम् महत्- समा. प्रादितत्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., प्रशमम्- in पु. लिं. द्वि. वि. ए. व. of प्रशमः- tranquility, calmness, peace of mind, एत्य & प्राप्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of इ- एति २ ग. प. प. प. to attain, to reach & प्र+ आप्- to obtain, reach, arrive at- (आप्- आप्नोति ५ ग. प. प. to to get, obtain), भवति & प्रतिपद्यते- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, to become & प्रति+ पद्- to arrive at, to become, to resort to, to approach, प्रायेण- mostly, generally, probably & हि- surly, certainly, indeed- both अव्ययs

**तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता ।**
**अलङ्घनीयता हेतुरुभयं तन्मनस्विनि** ॥३४०॥ -शिशुपालवधम् ४४.४८, सुधर्मा

अद्रौ तुङ्गत्वम् (अस्ति), न इतराः (गुणाः भवन्ति)। सिन्धौ न इदं (तुङ्गत्वम्, परन्तु) अगाधता (भवति)। मनस्विनि (पुरुषे), अलङ्घनीयता हेतुः तद् उभयं (भवति)॥

A mountain is heigh but nothing else. An ocean does not have this (height) but is very deep. A resolute person is endowed with both these insurmountable qualities.

तुङ्गत्वम्- height, elevation- तुङ्ग- adjctv- high, tall- त्वम्- suffix implies quality, nature, उभयम्- pron. adjctv- both, तद्- that & इदम्- this- all in न. लिं. प्र. वि. ए. व., इतराः- in पु. लिं. प्र. वि. ब. व.of इतरः- the other, अद्रौ, सिन्धौ & मनस्विनि- in पु. लिं. स. वि. ए. व. of अद्रिः- a mountain, सिन्धुः- an ocean & मनस्विन्- a steady- minded person, resolute, determined, अगाधता- unfordable depth- गाध- adjctv- shallow, not very deep- न गाध- अगाध- नञ् तत्पुरुष स.- ता suffix implies quality, nature &, अलङ्घनीयता- unfordablity, impassibility, uncrossableness- (लङ्घ्- लङ्घति- ते १ ग. उ. प. to go beyond, cross over, transgress- लङ्घनीय- क. वि. धा. सा. वि.- न लङ्घनीय- अलङ्घनीय & ता suffix implies quality, nature)- both in in स्त्री. लिं. प्र. वि. ए. व., हेतुः- purpose, cause, reason- in पु. लिं. प्र. वि. ए. व., न- no, not- अव्यय

**शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।**
**केन सृष्टमिदं रत्नं मित्रमित्यक्षरद्वयम्** ॥३४१॥ -हितोपदेशे मित्रलाभम् १९८, सुधर्मा

शोकारातिभयत्राणं, प्रीतिविश्रम्भभाजनम्, इदं, 'मित्रम्' इति अक्षरद्वयं रत्नं केन सृष्टम्?

Who created this jewel of two letters 'Mitra', which protects from sorrow, enemies and fear and with whom one can share affection and trust?

शोकारातिभयत्राणम्- one that is protecting from sorrow, enemies and fears- शोकम्- sorrow, grief, अरातिः- enemy, for, भयम्- fear, terror, dread, त्राणम्- protection, defense, guarded- त्राण- क. भू. धा. वि. of त्रै- त्रायते १ ग. आ. प. to protect, guard,, rescue or save from- शोकम् च अरातिः च भयम् च- शोकारातिभयम्- द्वंद्व स. & शोकारातिभयात् त्राणम् - पञ्चमी तत्पु स., प्रीतिविश्रम्भभाजनम्- repository of affection and confidence- प्रीतिः- love, affection, विश्रम्भः- trust,, confidence, भाजनम्- sharing, repository, receptacle, deserving person- प्रीतिः च विश्रम्भः च- प्रीतिविश्रम्भः- द्वंद्व स. & प्रीतिविश्रम्भस्य

भाजनम् - षष्ठी तत्पु स., इदम्- this, मित्रम्- a friend, अक्षरद्वयम्- a pair of letters- अक्षरम्- a letter, an alphabet, द्वयम्- a pair- अक्षरस्य द्वयम् - षष्ठी तत्पु स., रत्नम्- a gem, jewel & सृष्टम्- created, produced- सृष्ट- क. भू. धा. वि. of सृज्- सृजति ६ ग. प. प. to create, produce, make- all in न. लिं. द्वि. वि. ए. व., केन- by whom- in न. लिं. तृ. वि. ए. व. of किम्- who, इति- a particle used to report very words spoken- this, so, namely- अव्यय

**सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।**
**सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः**॥३४२॥ - श्रीमच्छंकराचार्यविरचितं षट्पदीस्तोत्रम् ३

नाथ, भेदापगमे सति अपि, अहं तव (परन्तु), त्वम् न मामकीनः (असि)। तरङ्गः सामुद्रः हि (अस्ति), (परन्तु), समुद्रः क्वचन न तारङ्गः (भवति)॥

Oh, Lord, after disappearance of difference (between you and me), I am yours but you are not mine. A wave is produced by the ocean, but the ocean is not at all produced by the waves.

नाथ- Oh, Lord, Master- in पु. लिं. सं. वि. ए. व., भेदापगमे & सति- both in पु. लि. स. वि. ए. व. of भेदापगमः- disappearance of differences- भेदः- distinction, difference, separation, अपगमः- elimination of, removal of, disappearance of- अप- अव्यय- prefix to verb implies away from, negation, गमः- going- भेदस्य अपगमः- ष. तत्पुरुष स. & सत्- being, happening, prevailing- कर्तरि वर्त. का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, to exist, अहम् (अस्मद्)- I, myself, त्वम् (युष्मद्)- you, मामकीनः- adjctv- my, mine, belonging to me, तरङ्गः- a wave, समुद्रः- an ocean, sea, सामुद्रः- related an ocean, sea-born, तारङ्गः- related a wave, produced by a wave- all in पु. लिं. प्र. वि. ए. व., तव- yours- in ष. वि. ए. व. of युष्मद्- you, क्वचन- क्व- अव्यय- where- क्व+ चन- somewhere, sometimes- न क्वचन- never, अपि-even, also, न- no, not, हि,- indeed, surely- all अव्ययs

**समुद्रेणान्तःस्थस्तटभुवि तरङ्गैरकरुणैः**
**समुत्क्षिप्तोऽस्मीति त्वमिह परितापं त्यज मणे।**
**अवश्यं क्वापि त्वद्गुणपरिचयाकृष्टहृदयो**
**नरेन्द्रस्त्वां कुर्यान्निजमुकुटकोटिप्रणयिनम्** ॥३४३॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

मणे, '(अहं) समुद्रेण अन्तःस्थः, अकरुणैः तरङ्गैः, तटभुवि समुत्क्षिप्तः अस्मि' इति त्वम् इह परितापं त्यज। अवश्यं क्व अपि त्वत् गुण- परिचय-आकृष्ट-हृदयः नरेन्द्रः, त्वां निज-मुकुट- कोटि-प्रणयिनम् कुर्यात्॥

Oh Jewel, please drop your agony that you are thrown out to the shore, from your inside place in the ocean, by these cruel waves! Some king, whose mind is set on you, due to his knowledge of your real worth, may surely select you, as his favourite prominent location in his crown.

मणे- in पु. लिं. सं. वि. ए. व. of मणिः- gem, jewel, समुद्रेण- in पु. लिं. तृ. वि. ए. व. of समुद्रः- ocean, sea, अन्तःस्थः- residing inside, staying within- अन्तर्- अव्यय- inside, under, within- अन्तर् तिष्ठति इति- उपपद तत्पुरुष स., समुत्क्षिप्तः- totally thrown outside- क. भू. धा. वि. of सं +उत् +क्षिप्- to totally throw

out- (क्षिप्- क्षिपति ६ ग. प. प. to throw, cast, send), गुणपरिचयाकृष्टहृदयः- one, whose mind is set on a thing due to knowledge of its real worth -गुणः- quality, virtue, परिचय- knowledge, familiarity, आकृष्ट- attracted, drawn towards- क. भू. धा. वि. of आ+ कृष्- (कृष्- कर्षति १ ग. प. प. to drag, draw, pull), हृदयम्- heart, mind- गुणस्य परिचयः- गुणपरिचयः- ष. तत्पुरुष स. & गुणपरिचयेन आकृष्टः- गुणपरिचयाकृष्टः- तृ. तत्पुरुष स., गुणपरिचयाकृष्टम् हृदयम् - कर्मधारय स., नरेन्द्रः- a King- नरः- a man, इन्द्रः- lord, master, ruler- नराणाम् इन्द्रः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., तटभुवि- in स्त्री. लिं. स. वि. ए. व. of तटभूः- shore or bank (of a river or sea)- तटः- slope, declivity- तटः, तटा, तटी, तटम्- shore or bank, भूः- land, earth- तटा भूः- वि. पू. प. कर्मधारय स., तरङ्गैः & अकरुणैः- in पु. लिं. तृ. वि. ब. व. of तरङ्गः- a wave & अकरुणः- heartless, cruel- करुणः-pity, compassion- न करुणः- नञ् तत्पुरुष स., अस्मि- वर्त. उ. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, त्वम्- you- प्र. वि. ए. व., त्वाम्- to you- द्वि. वि. ए. व. & त्वत्- from your- पं. वि. ए. व. of युष्मद्- you, परितापम्- in पु. लिं. द्वि. वि. ए. व. of परितापः- extreme agony, anguish, lamentation- परि- अव्यय- prefix implies: extreme, excessive, much, तापः- torment, anguish, त्यज- म. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, कुर्यात्- विध्यर्थ प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, निजमुकुटकोटिप्रणयिनम्- पु. लिं. द्वि. वि. ए. व. of निजमुकुटकोटिप्रणयिन्- a favourite attachment at prominent location in one's crown- निज- adjctv- one's own, self, मुकुटम्- crown, कोटि- highest point, prominent location, प्रणयिन्- desirous of, favourite, attached- निजस्य मुकुटम्- निजमुकुटम् & निजमुकुटस्य कोटिः- निजमुकुटकोटिः & निजमुकुटकोटेः प्रणयिन्- all ष. तत्पुरुष स., अवश्यम्- certainly, by all means, इति- a particle used to report very words spoken- thus, so, क्व- where, whither, अपि- even, also- क्व अपि- somewhere, sometimes, इह- here, in this world- all अव्ययs

**कोऽन्धो योऽकार्यरतः को बधिरो यो हितानि न शृणोति।**
**को मूको यः काले प्रियाणि वक्तुं न जानाति**॥३४४॥ -प्रश्नोत्तररत्नमालिका, -वैदिकवाङ्मयम्

कः अन्धः? यः अकार्यरतः (अस्ति)। कः बधिरः? यः हितानि न शृणोति। कः मूकः? यः काले प्रियाणि वक्तुं न जानाति ॥।

Who is blind? One who is engaged in wrong activities. Who is deaf? One who does not listen to the sound advice. Who is dumb? One, who does not know how to speak pleasantly at an appropriate time.

कः (किम्)- who, अन्धः- blind, यः (यद्)- one, who, अकार्यरतः- engaged in wrong activities- कार्य- work, duty, a thing to be done- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प.- न कार्य- अकार्य, रत- engaged, busy with- क. भू. धा. वि. of रम्- रमते १ ग. आ. प. to rejoice at, to be please- अकार्ये रतः- अकार्यरतः- स. तत्पुरुष स., बधिरः- deaf & मूकः- dumb, silent, speechless-all in पु. लिं. प्र. वि. ए. व., हितानि & प्रियाणि- both in न. लिं. द्वि. वि. ब. व. of हितम्- good, proper, beneficial- हित- क. भू. धा. वि. of हि-हिनोति ५ ग. प. प. to gratify, promote, urge, & प्रियम्- pleasant, desirable, beloved, शृणोति & जानाति- both वर्त. प्र. पु. ए. व. of श्रु- ५ ग. प. प. to listen, hear & ज्ञा- जानाति- जानीते ९ ग. उ. प. to know, understand, realise, काले- पु. स. वि. ए. व. of कालः- time, period, वक्तुम्- पू का वा हेत्वार्थक तुमन्त धा. सा. अव्यय of वच्- वक्ति २ ग. प. प. to say, speak, न- no, not-अव्यय

**सुशीलो मातृपुण्येन पितृपुण्येन पण्डितः ।**
**दातृत्वं वंशपुण्येन आत्मपुण्येन भाग्यवान्** ॥३४५॥ -वैदिकवाङ्गयम् संघ
पा. भे. दातृत्वं = औदार्यं

(मनुष्यः) सुशीलः मातृपुण्येन (भवति) । (सः) पितृपुण्येन पण्डितः (भवति)। (सः) दातृत्वं/औदार्यं वंशपुण्येन (प्राप्नोति)। (तथा) आत्मपुण्येन भाग्यवान् (भवति)॥

One inherits good character due to merits of his mother. He becomes a learned person due to good deeds of his father. He inherits generosity due to virtous acts of his family. But one is truly blessed on his own merits.

मातृपुण्येन, पितृपुण्येन, वंशपुण्येन & आत्मपुण्येन- all in न. लिं. तृ. वि. ए. व. of मातृपुण्यम्- meritorious acts of mother, पितृपुण्यम्- meritorious acts of father, वंशपुण्यम्- meritorious acts of the family & आत्मपुण्यम्- meritorious acts of one's ownself- मातृ- mother, पितृ- father, वंशम्- race, family & आत्मन्- one's ownself, पुण्यम्- meritorious act- मातुः पुण्यम्, पितुः पुण्यम्, वंशस्य पुण्यम् & आत्मनः पुण्यम्- all ष. तत्पुरुष स.s, सुशीलः- one with good character- सु- अव्यय- prefix implies: good & शीलः- character, behaviour- सुभगः शीलः- प्रादि कर्मधारय स., पण्डितः- a learned person, wise-man, expert, knowledgeable & भाग्यवान् (भाग्यवत्)- a lucky person, fortunate- all in पु. लिं. प्र. वि. ए. व., दातृत्वम् & औदार्यम्- generosity, largeheartedness- दातृ- donor, giver, त्वम्- suffix implies quality, nature & उदार- adjctv- generous, liberal- both in न. लिं. प्र. वि. ए. व.

**यथाम्भसि प्रसन्ने तु रूपं पश्यति चक्षुषा ।**
**तद्वत्प्रसन्नेन्द्रियवाञ्ज्ञेयं ज्ञानेन पश्यति**॥३४६॥- महाभा,शान्तिपर्व १२.१९७.२, सुधर्मा

यथा प्रसन्ने अम्भसि तु, (मनुष्यः) चक्षुषा, रूपं पश्यति, तद्वत् प्रसन्नेन्द्रियवान् ज्ञानेन ज्ञेयं पश्यति॥

Just like any object is visible to an eye in very clear water, a person with clear senses, by his own knowledge, sees what is to be known.

अम्भसि & प्रसन्ने- both in न. लिं. स. वि. ए. व. of अम्भस्- water & प्रसन्नम्- clear, pure, transparent, pleased, delighted- प्रसन्न- क. भू. धा. वि. of प्र+ अस्- (अस्- अस्ति २ ग. प. प. to be, to exist), चक्षुषा & ज्ञानेन- both in न. लिं. तृ. वि. ए. व. of चक्षुस्- an eye & ज्ञानम्- knowledge, understanding, proficiency, रूपम्- any visible object, figure, appearance & ज्ञेयम्- that is required to be known- ज्ञेय (also ज्ञातव्य & ज्ञानीय)- क. वि. धा. सा. वि. of ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand, realise- both in न. लिं. द्वि. वि. ए. व., पश्यति- वर्त. प्र. पु. ए. व. of दृश्- १ ग. प. प. to see, look at, प्रसन्नेन्द्रियवान्- प्रसन्न- see above, इन्द्रियम्- an organ of sense, वत्- suffix implies possession, quality- प्रसन्नानि इन्द्रियाणि यस्य सः- बहुव्रीहि स., यथा- like which, as, तद्वत्- like that, in that manner & तु- just, but, if- all अव्ययs

(नद्याः अन्योक्ती)
**कुरु गम्भीराशयतां कल्लोलैः जनय लोकविभ्रान्तिम्**
**वीतपयोधरलक्ष्मीः कस्य न चरणैर्विलङ्घ्यसि** ॥३४७॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्गयम्

(हे, नदि), कल्लोलैः गम्भीराशयतां कुरु । लोक- विभ्रान्तिं जनय। वीतपयोधरलक्ष्मीः कस्य न चरणैः विलङ्घ्यसि॥

(Oh, River) create torrential floods with your mighty waves! Generate utter confusion among the people!  Once the rainy season goes away, who will not cross you over by their feet ?

कल्लोलैः- in पु. लिं. तृ. वि. ब. व. of कल्लोलः- a large wave, गम्भीराशयताम् & लोकविभ्रान्तिम्- both in स्त्री. लिं. द्वि. वि. ए. व. of गम्भीराशयता- torrential flood-like condition- गम्भीर (गभीर)- adjctv- thick, dence, impervious, huge, आशयः- a bed chamber, reservoir- गम्भीरः आशयः- गम्भीराशयः- वि. पू. प. कर्मधारय स.- ता suffix implies: situation, condition & लोकविभ्रान्तिः- लोकः- people, public, विभ्रान्तिः- confusion, bewilderment- लोकानाम् विभ्रान्तिः- ष. तत्पुरुष स., कुरु & जनय- आज्ञार्थ म. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make & प्रयोजक of जन्- जनयति- cause to produce, create- (जन्- जायते ४ ग. आ. प. to be born, produced), वीतपयोधरलक्ष्मीः- past the heavy raining season- वीत- gone away, disappeared, departed- क. भू. धा. वि. of वि+ इ- (इ- एति २ ग. प. प. to go), पयोधरः- cloud- पयस्- न. लिं- water, धर- holder- पयः धरति इति- उपपद तत्पुरुष स.,  लक्ष्मीः- prosperity, affluence- पयोधरस्य लक्ष्मीः- पयोधरलक्ष्मीः- ष तत्पुरुष स. & वीता पयोधरलक्ष्मीः -  वि. पू. प. कर्मधारय स., कस्य- whose- in पु. लिं. ष. वि. ए. व. of किम्- who, चरणैः- पु/न. तृ. वि. ब. व. of चरणः/म्- foot, विलङ्घ्यसि- कर्मणि प्रयोग वर्त. म. पु. ए. व. of वि +लङ्घ्- to violate, transgress, overstep- (लङ्घ्- लङ्घति -ते १ ग. उ. प. to leap, to mount upon, ascend), न- no, not- अव्यय

**उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो**
**निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।**
**मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः**
**प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव** ॥३४८॥ -भर्तृहरी वैराग्यशतकम् ३

(मया) निधिशङ्कया क्षितितलम् उत्खातं । गिरेः धातवः ध्माताः । सरितां पतिः निस्तीर्णः । नृपतयः यत्नेन संतोषिताः । मन्त्राराधनतत्परेण मनसा श्मशाने निशाः नीताः। (तथा) अपि मया काणवराटकः न प्राप्तः । तृष्णे, (त्वं) सकामा भव॥

Expecting to find a treasure, grounds were dug to the bottom by me, minerals were blown out from the hill, the lord of rivers (oceans) were crossed, Kings were bribed with great effort, nights were spent with mindful sacred hymns in a crematorium , but not even a broken cowrie is gotten by me ! Oh, Desire, may you (now) be satisfied!

निधिशङ्कया- in स्त्री. लिं. तृ. वि. ए. व. of निधिशङ्का- with an expectation of a treasure; क्षितितलम्, उत्खातम् - both in न. लिं. द्वि. वि. ए. व.,  क्षितितलम् -  क्षितेः तलम्- ष. तत्पुरुष स,  क्षिति-ground, तलम्- bottom, उत्खातम्- excavated, dug up- क. भू. धा. वि. of उद् +खन् - to dig out- (खन्- खनति- ते १ ग. उ. प. - to excavate)- in न. लिं. प्र. वि. ए. व., गिरेः- in पु. लिं. ष. वि. ए. व. of गिरिः- mountain, hill, धातवः, ध्माताः, नृपतयः, संतोषिताः- all in पु. लिं. प्र. वि. ब. व. of धातुः- mineral, ध्मात- blown, puffed up- क. भू. धा. वि. of ध्मा- धमति १ ग. प. प. to blow a fire, excite a fire, नृपतिः- a king- नृ- a man, person, नृणाम् पतिः- नृपतिः- ष. तत्पुरुष, संतोषितः- entertained, pleasured, gratified- क. भू. धा. वि. of प्रयोजक of सं+ तुष्- संतोषयति-ते- (तुष्- तुष्यति ४ ग. प. प. to be pleased, happy), सरितां पतिः- ष. तत्पुरुष स -an ocean- (Lord of all Rivers), निस्तीर्णः- sailed across, crossed- क. भू. धा. वि. of निस्+ तृ- to cross over- (तृ- तरति १ ग. प. प. to cross), काणवराटकः- a broken cowrie- काण- adjctv- broken,

perforated, वराटकः- a cowrie- (कवडी - in marathi/hindi)- वि. पू. प. कर्मधारय स. & प्राप्तः- received, got- क. भू. धा. वि. of प्र+ आप्- to get, earn- (आप्- आप्नोति ५ ग. प. प. to obtain)- all in पु. लिं. प्र. वि. ए. व., यत्नेन- in पु. लिं. तृ. वि. ए. व. of यत्नः- effort, exertion, मन्त्राराधनतत्परेण & मनसा- both in न. लिं. तृ. वि. ए. व. of मन्त्राराधनतत्परम्- engaged in exclusive devotion to sacred hymns- मन्त्रः- a sacred hymn, prayer आराधनम्- worship, propitiation, तत्पर- adjctv- exclusively devoted to, engaged in- मन्त्रेण आराधनम्- मन्त्राराधनम्- तृ. तत्पुरुष स. & मन्त्राराधने तत्परम्- स. तत्पुरुष स. & मनस्- mind, heart, श्मशाने- in न. लिं. स. वि. ए. व. of श्मशानम्- crematorium, निशाः & नीताः- in स्त्री. लिं. प्र. वि. ब. व. of निशा- night & नीता- spent, passed- नीत- क. भू. धा. वि. of नी- नयति- ते १ ग. उ. प. to carry, lead away to, carried, मया- by me- तृ. वि. ए. व. of अस्मद्- I, तृष्णे- in स्त्री. लिं. सं. वि. ए. व. of तृष्णा- greed, excessive desire, सकामा- fulfilled desires- कामः- desire, greed- सफलाः कामाः यस्याः सा- बहुव्रीहि स.- in स्त्री. लिं. सं. वि. ए. व. भव- आज्ञार्थ म. पु. ए. व. of भू- भवति १ ग. प. प. to be, to exist, to become, अपि- also, even, न- no, not- both अव्ययs

**भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं**
**त्यक्त्वा जातिकुलभिमानमखिलं सेवा कृता निष्फला।**
**भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्**
**तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि संतुष्यसि** ॥३४९॥ --भर्तृहरी वैराग्यशतकम् २

(मया) अनेकदुर्गविषमं देशं भ्रान्तं, न किञ्चित् फलं प्राप्तं। अखिलं जातिकुलभिमानं त्यक्त्वा निष्फला सेवा कृता। परगृहेषु आशङ्कया काकवत् मानविवर्जितं भुक्तं। तृष्णे, पाप-कर्म-पिशुने, (त्वं), न अद्य अपि संतुष्यसि, जृम्भसि॥

I wandered across the difficult and rough country without any fruitful results. I uselessly served others, entirely neglecting the honour of my tribe and my family. I anxiously went to other's homes and ate their food, shamelessly like a crow.  But still, oh, Greed, desirous of sinful acts, you are still there and feel very proud about it!

*One can never satisfy one's own greed!*

त्यक्त्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of त्यज्- त्यजति १. ग. प. प. to leave, go away, निष्फला- meaningless- निस्- अव्यय- prefix implies negative- फलम्- fruit, result- निर्गता फला- व्याधि प्रादितत्पुरुष स., सेवा- service & कृता- done, made- कृत- क. भू. धा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do- all in स्त्री. लिं. प्र. वि. ए. व., परगृहेषु- in न. लिं. स. वि. ब. व. of परगृहम्- house of others- परः- other, another, गृहम्- house, dwelling- परस्य गृहम्- ष. तत्पुरुष स., आशङ्कया- in स्त्री. लिं. तृ. वि. ए. व. of आशङ्का- fear, apprehension, uncertainty, देशम्- country, अनेकदुर्गविषमम्- a place full of inaccessible terrains- एकम्- one, single, न एकम्- अनेकम्- many- नञ् तत्पुरुष स., दुर्- अव्यय- prefix implies bad, hard- दुःखेन गच्छति इति- दुर्ग- adjctv- inaccessible, विषम- adjctv- rough, uneven- अनेकम् दुर्गम्- अनेकदुर्गम् -वि. पू. प. तत्पुरुष स. & अनेकदुर्गेण विषम्- तृ. तत्पुरुष स., भ्रान्तम्- wandered- भ्रान्त- क. भू. धा. वि. of भ्रम्-भ्रमति १ ग. प. प. to wander, न किञ्चित् (किम्+ चित्)- nothing, फलम्- fruit, result, प्राप्तम्- received, obtained- क. भू. धा. वि. of प्र+ आप्- (आप्- आप्नोति. ५ ग. प. प. - to get), अखिलम्- entire, whole, जातिकुलभिमानम्- honour of race and family- जातिः- race, tribe, कुलम्- family, अभिमानम्- pride, honour- जातिः च कुलम् च- जातिकुलम्- द्वंद्व स. & जातिकुलस्य अभिमानम्- ष. तत्पुरुष स, काकवत्- like a crow- काकः- a crow & वत्- suffix implies quality, type,

मानविवर्जितम्- devoid of selfrespect, disgraceful- मानः- respect, honour, विवर्जित- devoid of, absence of- क. भू. धा. वि. of वि+ वृज्- to shun, avoid- (वृज्- वर्जति १ ग. प. प. to avoid)- मानात् विवर्जितम्- पं तत्पुरुष स. & भुक्तम्- eaten, enjoyed- भुक्त- क. भू. धा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग उ. प. to eat, enjoy- all in न. लिं. द्वि. वि. ए. व., तृष्णे & पापकर्मपिशुने- both in स्त्री. लिं. सं. वि. ए. व. of तृष्णा- thirst, greed, desire & पापकर्मपिशुनी- पाप- adjctv- evil, sinful, wicked, कर्मन्- न. लिं- work, act, doing- पिशुन- adjctv- indicating, manifesting, evincing- पापं कर्म- पापकर्म- वि. पू. प. कर्मधारय स. & पापकर्मस्य पिशुना - पापकर्मपिशुनी- ष. तत्पुरुष स, संतुष्यसि & जृम्भसि- वर्त. म. पु. ए. व. of सं+ तुष्- to feel very happy about- (तुष्- तुष्यति ४ ग. प. प. to be pleased or satisfied) & जृम्भ्- जृम्भते १ ग. आ. प. to expand, become visible or manifest, burst open, न- no, not, अद्य- today, now, अपि- also, even- all अव्ययs

**यद्यस्य नास्ति रुचिरं तस्मिंस्तस्य स्पृहा मनोज्ञेऽपि ।**
**रमणीयेऽपि सुधांशौ न मनःकामः सरोजिन्याः** ॥३५०॥ -भर्तृहरि-शृङ्गारशतक १०१

यद् यस्य रुचिरं न अस्ति, तस्मिन् मनोज्ञे अपि, तस्य स्पृहा (न भवति)। सुधांशौ रमणीये अपि सरोजिन्याः न मनःकामः (न अस्ति)॥

One does not crave for an undesirable object even if it is charming. (For example), the Moon, though delightful, is not liked by a lotus flower. (It blooms during day time only).

यद्- which & रुचिरम्- adjctv- tasteful, palatable, desirable- both in न. लिं. प्र. वि. ए. व., यस्य- to whom & तस्य- to him- both in पु. लिं. ष. वि. ए. व. of यद्- who & तद्- he, अस्ति- वर्त. प्र. पु. ए. व. of अस् २ ग. प. प. to be, to exist, मनोज्ञे & तस्मिन्- both in पु/न. लिं. स. वि. ए. व. of मनोज्ञ- adjctv- pleasing, beautiful, charming, agreeable- मनस्- न. लिं.- mind, heart- मनः जिज्ञासते - मनोज्ञम् उपपद तत्पु स. & तद्- that, स्पृहा- desire, longing, covetousness- in स्त्री. लिं. प्र. वि. ए. व., सुधांशौ & रमणीये- both in पु. लिं. स. वि. ए. व. of सुधांशुः- the Moon- सुधा- nectar, honey of flowers, beverage of Gods, अंशुः- a ray, beam of light- सुधा इव अंशवः यस्य सः- बहुव्रीहि स. & रमणीयः- pleasing, pleasant- रमणीय- (also रम्य & रन्तव्य)- क. वि. धा. सा. वि. of रम्- रमते १ ग. आ. प. to find delight, to be happy about, सरोजिन्याः- in स्त्री. लिं. ष. वि. ए. व. of सरोजिनी- a lotus, water lilly- सरस्- न. लिं- a lake, pond, सरसि जायते इति- सरोजम्- न. लिं.- सरोजिनी- स्त्री. लिं., मनःकामः- desired by the heart- मनः (मनस्)- heart, mind, कामः- desire, longing- मनः कामयते - उपपद तत्पु स. - in स्त्री. लिं. प्र. वि. ए. व.,अपि- also, even, न- no, not- अव्यय

**वैराग्ये संचरत्येको नीतौ भ्रमति चापरः ।**
**शृंगारे रमते कश्चिद्भुवि भेदाः परस्परम्** ॥३५१॥ -भर्तृहरि-शृङ्गारशतक १०२

एकः वैराग्ये संचरति । अपरः च नीतौ भ्रमति । कश्चित् (अन्यः) शृंगारे रमते । भुवि परस्परम् भेदाः (वर्तन्ते) ॥

One wanders in the world of asceticism, while the other walks around in the fields of statesmanship. Someone else finds delight in sexual passions. In this world, there are differences between one another.

वैराग्ये, नीतौ, शृङ्गारे & भुवि- all in स.वि. ए. व. of वैराग्यम्- न. लि.- absence of worldly desires or passion, asceticism, नीतिः- स्त्री लि.- conduct, behaviour, prudence, statesmanship, शृङ्गारः- पु. लि.- Sentiment of love or sexual passion, erotic sentiment & भू- स्त्री लि.- earth, world, संचरति, भ्रमति & रमते- all वर्त. प्र. पु. ए. व. of सं+ चर्- to wander, go about- (चर्- चरति १ ग. प. प. to walk, move, graze), भ्रम्- १ ग. प. प. to go about, roam, travel & रम्- रमते १ ग. आ. प. to find delight, to be happy about, एकः- one, an individual, अपरः- the other कश्चित् (कः+ चित्)- someone, may be someone- all in पु. लिं. प्र. वि. ए. व. & भेदाः- in पु. लिं. प्र. वि. ब. व. of भेदः- difference, division, dissension, परस्परम्- adjctv- mutual, each other, one another, against one another- in न. लिं. प्र. वि. ए. व. च- and- अव्यय

**येषां त्रीण्यवदातानि योनिर्विद्या च कर्म च |**
**तान्सेवेत्तैः समास्या हि शास्त्रेभ्योऽपि गरीयसी** ॥३५२अ॥
**निरारम्भा ह्यपि वयं पुण्यशीलेषु साधुषु |**
**पुण्यमेवाप्नुयामेह पापं पापोपसेवनात्** ॥३५२ब॥ - महाभा. अरण्यपर्व १.२५/२६, वैदिकवाङ्मयम्

अ) येषां त्रीणि, योनिः, विद्या च कर्म च, अवदातानि (सन्ति), तान् सेवेत्| तैः हि समास्याः, शास्त्रेभ्यः अपि गरीयसी (भवन्ति) ॥

ब) वयं निरारम्भाः हि अपि, पुण्यशीलेषु साधुषु पुण्यम् एव इह आप्नुयाम (तथा) पापोपसेवनात् पापं (आप्नुयाम) ॥

A) One should serve people whose family, knowledge and work are spotless. Association with them is more valuable than that of sacred scriptures.

B) Even though, we are not initiated into scared rituals, association with noble and meritorious people in this world, we would earn meritorious credits, while an association with criminals would incur sins..

येषाम्- for whom- in पु. लिं. ष. वि. ब. व. of यद्-who, त्रीणि & अवदातानि- both in न. लिं. प्र. वि. ब. व. of त्रि- three & अवदातम्- adjctv- spotless, pure, clean, polished, meritorious, virtuous- योनिः- lineage, birth origin, family & विद्या- knowledge, expertise- both in स्त्री. लिं. प्र. वि. ए. व., कर्म (कर्मन्)- work, deed, action-in न. लिं. प्र. वि. ए. व., तान्- to them & तैः- by them- both in पु. लिं. द्वि & तृ. वि. ब. व. of तद्- he, सेवेत्- विध्यर्थ प्र. पु. ए. व. of सेव्- सेवते १ ग. आ. प. to serve, attend upon, शास्त्रेभ्यः- in न. लिं. पं. वि. ब. व. of शास्त्रम्- sacred text, holy treatise, scripture, गरीयसी- in पु. लिं. प्र. वि. ए. व. of गरीयस्- adjctv- more important, weightier, समास्याः, वयम् & निरारम्भाः- all in पु. लिं. प्र. वि. ब. व. of समास्यः- to associate with, company of- सम- with, matching together with- आस्य- to be associated with, stayed with- क. वि. धा. सा. वि. of आस्- आस्ते २ ग. आ. प. to stay, dwell, to be- सम: आस्यः - समास्यः- कर्मधारय स., अस्मद्- I & निरारम्भः- one who is not initiated to scared rituals (like yajna, pooja, etc)- आरम्भः- initiation, introduction, निर्- अव्यय- prefix implies: devoid of, absence of- निर् आरम्भः - प्रादि कर्मधारय स., पुण्यशीलेषु & साधुषु- both in पु. लिं. स. वि. ब. व. of पुण्यशीलः- meritorious or virtuous person- पुण्य- adjctv- meritorious act, शीलः- conduct, behaviour- पुण्यः शीलः यस्य सः- बहुव्रीहि स. & साधुः- a noble or pious person, पुण्यम्- virtue & पापम्- sin, evil, crime- both in न. लिं. द्वि. वि. ए. व., आप्नुयाम- विध्यर्थ उ. पु. ए. व. of आप्- आप्नोति ५ ग. प. प. to get, acquire, पापोपसेवनात्- in न. लिं. पं. वि. ए. व. of पापोपसेवनम्- association with sin or crime,

पापम्- sin, crime, उपसेवनम्- association, adiction to- पापस्य उपसेवनम्- ष. तत्पुरुष स., हि- certainly, surely, only, just, च- and, अपि- and, also, even, एव- just, only, इह- here, in this world- all अव्ययs

**असतां दर्शनात् स्पर्शात् सञ्जल्पाच्च सहासनात् ।**
**धर्माचाराः प्रहीयन्ते न च सिध्यन्ति मानवाः** ॥३५३॥ -महाभा-अरण्यपर्व १.२९, -वैदिकवाङ्मयम्

धर्माचाराः असतां दर्शनात्, स्पर्शात्, सञ्जल्पात् च सहासनात् प्रहीयन्ते । (तथा) मानवाः न च सिध्यन्ति।

Practice of one's Dharma is lost completely by seeing, touching, talking and sitting together with wicked people. (By doing so) men will not succeed (in their lifves).

धर्माचाराः & मानवाः- both in पु. लिं. प्र. वि. ब. व. of धर्माचारः- observing of prescribed codes of practice (Dharma)- धर्मः- prescribed codes of practice, rightful duty, आचारः- practice, conduct, behaviour- धर्मस्य आचारः- ष. तत्पुरुष स. & मानवः- a man, person, human, असताम्- in पु. लिं. ष. वि. ब. व. of असत्- a wicked or dishonest person- सत्- noble, good, well-behaved- न सत्- नञ् तत्पुरुष स., दर्शनात्, स्पर्शात्, सञ्जल्पात् & सहासनात्- all in पं. वि. ए. व. of दर्शन- seeing, looking at, स्पर्शः- touch, contact, सञ्जल्पः- talking with & सहासनः- sitting together- सह- अव्यय- together, along with, आसनम्- seat- आसनेन सह  सहासनः- सहबहुव्रीहि स., प्रहीयन्ते- कर्मणि प्रयोग प्र. पु. ब. व. of प्र+ हा- प्रहीयते  to be lost totally- हा-जहाति २ ग. प. प. to leave, abandon, सिध्यन्ति- वर्त प्र. पु. ब. व. of सिध्- सिध्यति ४ ग. प. प. to be accomplished, successful, fulfilled, न- no, not & च- and- both अव्ययs

**मनसो दुःखमूलं तु स्नेह इत्युपलभ्यते।**
**स्नेहात्तु सज्जते जन्तुर्दुःखयोगमुपैति च** ॥३५४॥ -महाभा. अरण्यपर्व २.२६

स्नेहः मनसः दुःखमूलं तु इति उपलभ्यते। जन्तुः स्नेहात् तु सज्जते दुःखयोगम् च उपैति॥

Affection is perceived as the root cause of all sorrows. Due to this affection only, a living being develops attachments which result in dissatisfaction.

स्नेहः- affection, love, tenderness & जन्तुः- a living being, creature- both in पु. लिं. प्र. वि. ए. व., मनसः- in न. लिं. ष. वि. ए. व. of मनस्- mind, heart, thought, दुःखमूलम्- root cause of all sorrows- दुःखम्- sorrow, trouble, distress, मूलम्- root, basis, origin- दुःखस्य मूलम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., उपलभ्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of उप+ लभ्- to perceive, understand, see- (लभ्- लभते १ ग. आ. प. to get, obtain), स्नेहात्- in पु. लिं. पं. वि. ए. व. of स्नेहः-  see above, दुःखयोगम्- incidence of sorrow or distress- दुःखम्- sorrow, योगम्- contact, means, consequence, result, application, course- दुःखस्य योगम्- ष. तत्पुरुष स., सज्जते & उपैति- वर्त. प्र. पु. ए. व. of सस्ज्- सज्जति- ते १ ग. उ. प. to go, become ready, to be attached to & उप+ इ- to approach, go to, pass into- (इ- एति २ ग. प. प.  to go), तु- but, on the other hand, just, mere, इति- a particle used to report very words spoken: thus, so, च-and- all अव्ययs

**कुस्थानस्य प्रवेशेन गुणवानपि पीड्यते।**
**वैश्वानरोऽपि लोहस्थः कारुकैरभिहन्यते**॥३५५॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्ग्यम्

गुणवान् अपि कुस्थानस्य प्रवेशेन पीड्यते। (यथा) लोहस्थः वैश्वानरः अपि कारुकैः अभिहन्यते॥

Even a virtous person is harmed by entering a wrong place. Even the mighty fire gets hammered badly by mechanics, when it enters iron.

गुणवान् (गुणवत्)- a person endowed with merits, virtue- गुणः- quality, merit, virtue, excellence- वत्- suffix implies: nature, possession, लोहस्थः- one, that has entered into a metal- लोहम्- iron, steel, any metal- लोहे तिष्ठति इति- उपपद तत्पुरुष स. & वैश्वानरः- an epithet of fire- all in पु. लि. प्र. वि. ए. व., कुस्थानस्य- in न. लि. ष. वि. ए. व. of कुस्थानम्- a wrong place- कु- अव्यय- prefix implies bad, wrong, स्थानम्- location, place- कुत्सितम् स्थानम्- प्रादि कर्मधारय स., प्रवेशेन- in पु. लि. तृ. वि. ए. व. of प्रवेशः- enterance, penetration, कारुकैः- in पु. लि. तृ. वि. ब. व. of कारुकः- an artisan, mechanic, maker, पीड्यते & अभिहन्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of पीड्- to cause to hurt, trouble- (पीड् पीडयति- ते १० ग. उ. प. to harass, hurt, harm, injure) & अभि+ हन्- to cause to destroy completely- (हन्- हन्ति २ ग. प. प. to to strike, kill), अपि- also, even- अव्यय

**अद्रोहश्चाप्यलोभश्च दमो भूतदया शमः।**
**ब्रह्मचर्यं तपं शौचमनुक्रोशं क्षमा धृतिः**
**सनातनस्य धर्मस्य मूलमेव दुरासदम्** ॥३५६॥ -मत्स्यपुराण, १४३/३१-३२, वैदिकवाङ्ग्यम्

अद्रोहः च अपि अलोभः च दमः, भूतदया, शमः, ब्रह्मचर्यं, तपं, शौचम्, अनुक्रोशं, क्षमा (तथा) धृतिः (एते), सनातनस्य धर्मस्य दुरासदम् मूलम् एव (भवति)॥

Non-treachery, non-greediness, self-control, compassion for all living beings, calmness, chastity, penance, cleanliness, tender nature, forbearance and firm resolve are indeed the difficult to achieve foundations of eternal Dharma.

द्रोहः- treachery, plotting against- न द्रोहः- अद्रोहः- non-treachery- नञ् तत्पुरुष स., लोभः- greediness- न लोभः- non-greediness- नञ् तत्पुरुष स., दमः- self-control, restraint, शमः- calmness, repose- all in पु. लिं. प्र. वि. ए. व., ब्रह्मचर्यम्- study bof Vedas, scriptures, religious studentship, life of celibacy, तपम्- religious austerity/ penance, शौचम्- physical cleanliness, purity, अनुक्रोशम्- tenderness, pity, मूलम्- root, basis, original cause & दुरासदम्- very difficult to achieve- दुर्- अव्यय- prefix to words implies: bad, hard, difficult- आसदं - meeting दुखं आसदं - प्रादि कर्मधारय all in न. लिं. प्र. वि. ए. व., भूतदया- compassion for all living beings- भूतम्- living being- भूत- क. भू. धा. वि. of भू- भवति- १ ग. प. प. - to be, to exist, दया- compassion, sympathy- भूतेषु दया- स. तत्पुरुष स., क्षमा- forbearance, forgiveness, धृतिः- preservation, resolve- all in स्त्री. लिं. प्र. वि. ए. व., सनातनस्य & धर्मस्य- both in पु. लिं. प्र. वि. ए. व. of सनातनः- adjctv- perpetual, eternal, permanent & धर्मः- prescribed codes of conduct (dharma), एव- just, only, च- and, अपि- also, even- all अव्ययs

**अलिरनुसरति परिमलं लक्ष्मीरनुसरति नयनिपुणम्।**
**निम्नमनुसरति सलिलं विधिलिखतं बुद्धिरनुसरति** ॥३५७॥ -अंतर्जालतः

अलिः परिमलम् अनुसरति, लक्ष्मीः नयनिपुणम् अनुसरति, सलिलम् निम्नम् अनुसरति, (तथा) बुद्धिः विधिलिखितम् अनुसरति॥
A bee goes after the scent or fragrance, Goddess of wealth follows well-behaved person, water flows towards the low ground and one's thinking follows to the written destiny.

अलिः- black bee, bee in general- in पु. लिं. प्र. वि. ए. व., परिमलम्, नयनिपुणम्- in पु. लिं. द्वि. वि. ए. व. of परिमलः- fragrance, perfume, scent, नयनिपुणः- organised or well-behaved person- नयः- course of conduct, behaviour, policy, निपुणः- expert, skilful, clever sharp- नये निपुणः- स. तत्पुरुष स. अनुसरति- वर्त. प्र. पु. ए. व. of अनु+ सृ- to follow, go after- (सृ- सरति १ ग. प. प. to go forward, approach), लक्ष्मीः- wealth, prosperity, riches & बुद्धिः- intellect, intelligence, knowledge- both in स्त्री. लिं. प्र. वि. ए. व., सलिलम्- water- in न. लिं. प्र. वि. ए. व., निम्नम्- low ground, a slope, a depression & विधिलिखितम्- writing of the destiny, fate- विधिः- पु. लिं.- luck, fate, destiny, लिखितम्- writing- लिखित- क. भू. धा. वि. of लिख्- ६ ग. प. प. to write, inscribe- विधेः लिखितम्- ष. तत्पुरुष स.-both in न. लिं. द्वि. वि. ए. व.

**व्याधेरनिष्टसंस्पर्शाच्छ्रमादिष्टविवर्जनात् ।**
**दुःखं चतुर्भिः शारीरं कारणैः सम्प्रवर्तते**॥३५८अ॥
**तदा तत्प्रतिकाराच्च सततं चाविचिन्तनात् ।**
**आधिव्याधिप्रशमनं क्रियायोगद्वयेन तु** ॥३५८ब॥ -महाभा. अरण्यपर्व २२,२३

व्याधेः, अनिष्टसंस्पर्शात्, श्रमात्, इष्टविवर्जनात् (एतैः) चतुर्भिः कारणैः शारीरं दुःखं सम्प्रवर्तते। तदा सततं तत्प्रतिकारात् च अविचिन्तनात् च क्रियायोगद्वयेन तु आधिव्याधिप्रशमनं (भवति)॥

Physical suffering arises due to these four reasons, namely, sickness, unhealthy contact, physical exertion and loss of a desired thing. Mental anguish & physical ailment is then overcome by applying two actions, namely, counter measures and not worrying.

व्याधेः, अनिष्टसंस्पर्शात्, श्रमात्, इष्टविवर्जनात्, तत्प्रतिकारात् & अविचिन्तनात्- all in पु/न. लिं. पं. वि. ए. व. of व्याधिः- sickness, ailment, अनिष्टसंस्पर्शः- occurrence of unpleasant happening- इष्टः- a thing desired or longed for- न इष्टः- अनिष्टः- undesirable or unpleasant thing- नञ् तत्पुरुष स., संस्पर्शः- contact, touch, अनिष्टस्य संस्पर्शः- ष. तत्पुरुष स., श्रमः- exertion, exhaustion, इष्टविवर्जनम्- loss of a desired thing- इष्ट- adjctv- dear, wanted- क. भू. धा. वि. of इष्- इच्छति ६ ग. प. प. to desire, विवर्जनम्- leaving, departing- इष्टस्य विवर्जनम्- ष. तत्पुरुष स., तत्प्रतिकारः- prevention of that- प्रतिकारः- counter action, retribution, prevention- तस्य प्रतिकारः- ष. तत्पुरुष स. & अविचिन्तनम्- not constantly thinking about- विचिन्तनम्- constantly thinking about- न विचिन्तनम्- नञ् तत्पुरुष स., चतुर्भिः & कारणैः- both in न. लिं. तृ. वि. ब. व. of चतुर्- four & कारणम्- reason, cause, शारीरम्- belonging to body, physical- (शरीरम्- body), दुःखम्- pain, sorrow, distress, सम्प्रवर्तते- वर्त. प्र. पु. ए. व. of सं +प्र + वृत्- to arise, to take place- (वृत्- वर्तते- १ ग. आ. प. to be, to exist), क्रियायोगद्वयेन- in न. लिं. तृ. वि. ए. व. of क्रियायोगद्वयम्- application of a pair of action- क्रिया- action, act, doing, योग- application, deployment, द्वयम्- a pair, couple- क्रियायाः योगम्- क्रियायोगम् & क्रियायोगस्य द्वयम्-

क्रियायोगद्वयम्- both ष. तत्पुरुष स., आधिव्याधिप्रशमनम्- extinction of mental anguish & physical ailment- आधिः- anxiety, mental anguish, व्याधिः- sickness, प्रशमनम्- pacification, extinction, soothing- आधिः च व्याधिः च- आधिव्याधिः- द्वंद्व स. & आधिव्याध्योः प्रशमनम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., तदा- then, at that time, सततम्- constantly, always, च- and, तु- but, on the other hand- all अव्ययs

**पूर्णे तटाके तृषितः सदैव**
**भूतेऽपि गेहे क्षुधितः स मूढः ।**
**कल्पद्रुमे सत्यपि वै दरिद्रः**
**गुर्वादियोगेऽपि हि यः प्रमादी** ॥३५९॥ -वैदिकवाङ्मयम्

यः गुर्वादियोगे अपि हि प्रमादी, सः मूढः, पूर्णे तटाके सदा तृषितः एव, गेहे भूते अपि क्षुधितः (एव तथा) कल्पद्रुमे सति अपि वै दरिद्रः (एव भवति)॥

If a person in the company of teachers does not learn anything from them, that foolish person is like the one who remains thirsty being on the banks of tank full of water or like the one who remains starved with all provisions at home or like the one one who remains poor even after having a wish-granting tree.

यः (यद्)- who, प्रमादी (प्रमादिन्)- careless, negligent, intoxicated, insane, सः (तद्)- he, मूढः- stupid, foolish, तृषितः- thirsty & क्षधितः- hungry- (मूढ, तृषित & क्षधित- all क. भू. धा. वि. of मुह्- मुह्यति- to be stupid, foolish, तृष्- तृष्यति- to be thirsty, & क्षुध्- क्षुध्यति- to be hungry- all ४ ग. प. प.) & दरिद्रः- poor, indigent- all in पु. लिं. प्र. वि. ए. व., गुर्वादियोगे, पूर्णे, तटाके, भूते, गेहे, कल्पद्रुमे & सति- all in पु/न. लिं. स. वि. ए. व. of गुर्वादियोगः- an opportunity to be with teachers or preceptors- गुरुः- teacher, preceptor, elder, आदिः- at end of compound mean: 'beginning with', 'etc', 'such like'- (e.g. देवादिः, स्वादिः etc- गुरुः+ आदिः- गुर्वादिः)- योगः- contact, connection, opportunity- गुर्वादीनाम् योगः- गुर्वादियोगः- ष. तत्पुरुष स., पूर्णः- full, filled up- क. भू. धा. वि. of पूर्- पूर्यते- ते ४ ग. आ. प. to fill, तटाकः/कम्- pond, tank, भूत- being there, available, existed- क. भू. धा. वि. of भू- भवति १ ग. प. प. to be, to exist, गेहम्- house, home, abode, कल्पद्रुमः- wish-granting tree- कल्प- adjctv- practicable, feasible, fit, competent- द्रुमः- tree- कल्पप्रदः द्रुमः- उ. प (म. प.) लो. स. & सत्- being available, existing- वर्त. का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, वै- a particle of affirmation or certainty- indeed, truly, अपि- even, also, हि- indeed, truly, सदा- always, daily, एव- just only, merely- all अव्ययs

**उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।**
**तथैव ज्ञानकर्मभ्यां जायते परमं पदम्** ॥३६०॥ -योगवासिष्ठः १.१.७

यथा पक्षिणाम् उभाभ्याम् एव पक्षाभ्यां खे गतिः (वर्तते), तथा एव ज्ञानकर्मभ्यां परमं पदम् जायते॥

Just as the flight of the birds in the sky takes place only with both wings, so also a person can attain the supreme state by aquiring knowledge and performance of his own duties only.

पक्षिणाम्- in पु. लिं. ष. वि. ब. व. of पक्षिन् - one furnished with wings, a bird, उभाभ्याम्, पक्षाभ्याम् & ज्ञानकर्मभ्याम्- all in तृ. वि. द्वि. व. of उभ- pron. adjctv- both- (always in द्वि. व.), पक्षः- पु. लिं- a wing & ज्ञानकर्मन्- understanding & action- ज्ञानम्- understanding, knowledge, intelligence & कर्मन्- work, deed, effort- ज्ञानम् च कर्म च- द्वंद्व स., खे- in न. लिं. स. वि. ए. व. of खम्- sky, गतिः- movement, going, motion, mode of existence- in स्त्री. लिं. प्र. वि. ए. व., परमम्- ultimate, supreme, final & पदम्- position, destination, goal- both in न. लिं. प्र. वि. ए. व., जायते- वर्त. प्र. पु. ए. व. of जन्- ४ ग. आ. प. to arise, happen, take place, to be produced, यथा- like which, as, तथा- like that, in that manner, way, एव- only, just, merely- all अव्ययs

**अतीतानागते चोभे पितृवंशं च भारत ।**
**तारयेद् वृक्षरोपी च तस्माद् वृक्षांश्च रोपयेत्** ॥३६१॥ -महाभारत-अनुशासनपर्व- १३.९३.२६

भारत, वृक्षरोपी अतीतानागते उभे च पितृवंशं च तारयेद् । तस्मात् वृक्षान् च रोपयेत्॥

Oh, King Bhaarat, a planter of trees liberates both, those who came before and those who are yet to come and his entire paternal family. Therefore, one should indeed plant many trees.

भारत- one belonging to Bharat in पु. लिं. सं. वि. ए. व., वृक्षरोपी- in पु. लिं. प्र. वि. ए. व. of वृक्षरोपिन्- planter of tree- वृक्षः- a tree, वृक्षाणां- planter- वृक्षाणां वृक्षाणां इति- ष.तत्पुरुष स., अतीतानागते & उभे- both in न. लिं. द्वि. वि. द्वि. व. of अतीतानागतम्- one that is past and the one that is yet to come- अतीत- past, gone beyond, crossed- क. भू. धा. वि. of अति+ इ- to pass over, go over- (इ- एति २ ग. प. प. to go, to go towards), आगत- arrived, having come- क. भू. धा. वि. of आ+ गम्- to arrive- (गम्- गच्छति १ ग. प. प. to go)- न आगत- अनागत- one yet to come- अतीतः च अनागतः च- अतीतानागतः- द्वंद्व स. & उभम्- adjctv- both, पितृवंशम्- in न. लिं. द्वि. वि. ए. व.- entire paternal family- पितृ- पु. लिं.- father- पितरः- ancestors, forefathers, वंशम्- family, race, dynasty- पितृणाम् वंशम्- पितृवंशम्- ष. तत्पुरुष स., तारयेद् & रोपयेत्- both प्रयोजक विध्यर्थ प्र. पु. ए. व. of तृ- तारयति- ते- to save, liberate, to cause to arrive at- (तृ- तरति १ ग. प. प. to crossover, to accomplish) & रुह्- रोपयति- ते- to plant, to cause to grow - (रुह्- रोहति १ ग. प. प. to grow, spring up, germinate), वृक्षान्- in पु. लिं. द्वि. वि. ब. व. of वृक्षः- a tree, तस्मात्- therefore, for that reason & च- and- both अव्ययs

**गायत्री मन्त्र**

**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं ।**
**भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥**- ऋग्वेद ३. ६२. १०

ॐ भूः भुवः स्वः। तत् वरेण्यं (अस्ति)। (वयं) सवितुः देवस्य भर्गः धीमहि। यः नः धियः प्रचोदयात्॥

Gāyatrī Mantra

Om, the Brahman, the Ultimate Reality, pervades the Earth, the Intermediate Space and the Heavens. It (Brahman) is most worshippable. We meditate on that divine radiance of the God, Sun (a manifestation of Brahman). May He awaken our Spiritual Consciousness!

ॐ - Brahman, the Ultimate Reality भूः - Earth, Physical Plane, भुवः - Intermediate space, Mental Plane स्वः -Heavens, Spiritual plane, Consciousness, तत् - That, ॐ; वरेण्यं - न. लिं. प्र. वि. द्वि. व. of वरेण्य - Best, most excellent, सवितुः- पु. लिं. ष. वि. ए. व. of सवितृ- the Sun देवस्य- पु. लिं. ष. वि. ए. व. of देव - God. भर्गः -splendour, effulgence, radiance; धीमहि - We meditate ना. सा. धातु - उ. पु. ब. व. Pre-Panini verb form; - we meditate; यः - Who, He; नः - ष. वि. ब. व. of अस्मद् - I , we धियः - प्र. वि. ब. व of धी - Intellect; प्रचोदयात् - प्र+ चुद्- १० ग. उ. प - प्र. पु. ए. व. प. प. विध्यर्थ.- to inspire, awaken